CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सौपानैरुज्वलैश्चैव हंसकारन्टवाकुलैः ।
भासमानो महान् तत्र क्रीडाशैलो विराजते ॥ ९

तस्मिन् भूमिरुहास्सर्वे हेमरूपा लसन्त्यलम् ।
क्रीडाशैलस्य तस्यैव गुहायां यौवनोद्भवाः ॥ १०

यक्षाश्च किन्नराश्चैव गन्धर्वास्सिद्धचारणाः ।
क्रीडन्त्यहर्निशं सर्वे स्वस्वदारेषु संवृताः ॥ ११

तत्रैकदेशे पुरुषास्त्रिनेत्राः शूलधारिणः ।
भस्मोद्‌धूलितसर्वाङ्गाः चन्द्रखण्डसुमण्डिताः ॥ १२

रुद्राक्षमालाभूषाश्च वामभागस्वद्वराङ्गनाः ।
शिवध्यानरताश्चैव गौरीपूजनतत्पराः ॥ १३

स्वतेजोभिर्दिशास्सर्वा भासयन्तो दिवानिशम् ।
तान् सर्वान् परमेशान स्वकारानद्भुतानपि ॥ १४

दृष्ट्वा सा विस्मिता गौरी तस्मिन्नुद्यान पर्वते ।
किञ्च प्रदेशान्तरस्य पर्वतस्योत्तरेपुनः ॥ १५

अपश्यत् परमत्यन्तभासुरं किञ्चिदद्भुतम् ।
सहस्रमानहेमाभं द्वात्रिंशद्योजनावृतम् ॥ १६

नवरत्नमयं रम्यं नानाधातूपशोभितम् ।
कलधौतमयै कुड्यैः चतुरस्रगृहाङ्गणैः ॥ १७

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

चन्द्रकान्तशिलारूपैःप्रासादैरुपशोभितम् ।
तन्त्रेन्द्रनीलखचितमण्डपोद्भासितान्यपि ॥ १८

चतुर्दिक्षु च दिव्यानि नवरत्नमथान्यपि ।
रत्नधामान्यनेकानि निधीनां हास्यदान्यपि ॥ १९

लसन्त्यनुपमाकाराण्यतिचित्राणि सर्वतः ।
तेष्वत्यद्भुतलावण्याः सर्वाः षोडशवार्षिकाः ॥ २०

प्रपञ्चमोहकास्सर्वे कोटिमन्मथविग्रहाः ।
शिवानन्दामृतास्वादाः शिवा रन्ध्रे शिवार्चकाः ॥ २१

स्त्रियो यौवनसम्पन्नाः सर्वा द्वादशवार्षिकाः ।
प्रातस्सम्फुल्लकमलपरिहासि पदाम्बुजाः ॥ २२

मत्तमन्मथतूणीरजन्धाद्वन्द्वविराजिताः ।
मणिदर्पणसङ्काशजानुमण्डलमण्डिताः ॥ २३

रणन्मणिमयाकारनूपुरद्वयशोभिताः ।
शातकुम्भमयाकार रम्भास्तम्भोप शोभिताः ॥ २४

तप्तजाम्बूनदक्लृप्तकाञ्चीगुणसुशोभिताः ।
अस्तिनास्तीतिविषयसन्देहाद्भुतमध्यमाः ॥ २५

सौन्दर्यलहरीपूर्णनाभीह्रदविराजिताः ।
रोमराजिनदीरम्यतरङ्गसुवलित्रयाः ॥ २६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

एकनालीसमुद्भूतपद्मकोशकुचद्वयाः ।
गलशङ्खगलद्रत्नहारपीपूषधारिकाः ॥ २७

कुचसिंहासनारूढमारराजाभिषेचकाः ।
शिरीषकुसुमाक्लिप्तमाल्यरम्य भुजद्वयाः ॥ २८

इन्दीवरदलाकार नयनद्वयशोभिताः ।
अकलङ्कशरच्चन्द्रमुखमण्डलशोभिताः ॥ २९

अष्टमीचन्द्रसंशोभिललाटतटमण्डिताः ।
नासिकाकदलीरम्यदलभ्रुलतिकान्विताः ॥ ३०

सिन्धूरबन्धुकारश्रीसीमन्तमणिशोभिताः ।
कन्दर्परथचक्रायताटङ्कद्वयशोभिताः ॥ ३१

कौसुम्भदिव्यग्रथितकञ्चुकोपरिमण्डिताः ।
कर्पूरदिव्यवीटीभिरामोदितदिगन्तराः ॥ ३२

एवंभूताः पुनःश्यामा रमणैस्वैर्लसन्त्यहो ।
दृष्टवातिविस्मिता गौरी कैलासावनि शेखरे ॥ ३३

रमणं शिवमाहेति कृताञ्जलिपुटा तदा ।
देवीस्वामिन् शम्भो महादेव ममाभीष्टप्रदायक ॥ ३४

नमस्ते देवदेवेश नमस्ते भक्तवत्सल ।
नमस्ते जगदीशान नमस्ते दिव्यमङ्गल ॥ ३५

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

जय देव महादेव जय सर्वजगत्पते ।
यद्यस्ति करुणा मेऽद्य निस्सन्देहां कुरुष्व माम् ॥ ३६

इति संप्रार्थितो गौर्या प्रियवाक्यानुरञ्जितः ।
अब्रवीदद्भुतं वाक्यं साम्बो गम्भीरया गिरा ॥ ३७

साधु पृष्टमिदं साधु कल्याणि मङ्गलेऽधुना ।
त्वदभीष्टवरं दास्ये त्वत्संशयमुदाहर ॥ ३८

इति तद्वचनं श्रुत्वा गौरी भर्तारमब्रवीत् ।
गौरीस्वामिन् तस्मिन् गिरौ त्वदाकारा महोन्नताः ॥ ३९

युवानः पुरुषाश्चैव त्वच्चिह्नपरिभासुराः ।
मदाकारा युवत्यश्च भासन्ते किमिदं प्रभो ॥ ४०

अद्भुतं किमिदं शम्भो किं भ्रमो मम तद्वद ।
एतावत्कालपर्यन्तं त्वद्रूपाः पुरुषाः पुनः ॥ ४१

मद्रूपाः च स्त्रियश्चापि न सन्तीति मतिर्मम ।
तद्वैपरीत्यमधुना दृष्टमत्र दयानिधे ॥ ४२

केन वा हेतुना सर्वे पुरुषाश्च स्त्रियश्च ताः ।
त्वद्रूपाश्च मदाकारा जातास्तद्वद मे प्रभो ॥ ४३

इति गौर्या वचः श्रुत्वा प्रोवाच परमेश्वरः ।
एते च पुरुषास्सर्वे श्यामाः सर्वाश्च ताः पुनः ॥ ४४

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वैद्यनाथस्थलावासात् मदीयार्चनवैभवात् ।
तत्स्थानसेवनं (कृत्वा) सर्वसौभाग्यवान्भवेत् ॥ ४५

तन्मे प्रियतरं विद्धि वैद्यनाथस्थलं शुभम् ।
वैद्यनाथस्थले तत्र गृध्रेणाराधितो ऋचा ॥ ४६

रामेण पूजितस्सोऽहं स्कन्देन रविणापि च ।
तत्स्थानं प्रथितं भूमौ गृध्रऋक्सूर्यनामकम् ॥ ४७

श्वशुरावासभूमिर्यो हिमाद्रिर्मम भामिनि ।
ततोऽपि वैद्यनाथेऽस्मिन् स्थले प्रीतिर्न संशयः ॥ ४८

मरुद्वृधातटे पुण्ये पदानि मम सन्ति वै ।
स्वयंभूनि सहस्राणि प्रसिद्धानि नगात्मजे ॥ ४९

सहस्रेषु पदेष्वेषु मदीयेषु च भामिनि ।
अतिप्रियकराण्यद्य प्रवक्ष्यामि च तान्यहम् ॥ ५०

इति श्रीशैवपुराणे कोटिरुद्रसंहितायां उत्कृष्टशिवक्षेत्रप्रकरणे श्रीवैद्यनाथस्थानमाहात्म्ये गौरीसंवादो नाम तृतीयोऽध्यायः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

॥ चतुर्थोऽध्यायः ॥

अगस्त्यः —

प्रभावमतिपुण्यानां मदीयानां महेश्वरि ।
मरुद्वृधातटस्थानां नामानि प्रवदाम्यहम् ॥ १

स्थाननाम कथ्यतेऽद्य सावधानयुता शृणु ।
कावेर्यास्तीरयोर्नद्याः पुण्ययोरुभयोरपि ॥ २

स्वायम्भून्युत्तमान्येव प्रवक्ष्यामि यथाक्रमम् ।
प्रिये रत्नगिरिर्नाम कावेर्या दक्षिणे तटे ॥ ३

अस्ति क्षेत्रं महापुण्यं सर्वसौभाग्यदायकम् ।
तस्मिन् स्थले त्वया साकं निवसामि मुदा प्रिये ॥ ४

तस्य रत्नगिरेः शृङ्गे कल्पद्रुम समा द्रुमाः ।
चम्पकास्त्वथ चाम्पेयाः पनसाः पाटलास्तथा ॥ ५

चन्दनाः पारिजाताश्च सर्वदा विलसन्ति च ।
कावेर्याश्चोत्तरे भागे मक्षिकापर्वतोत्तमे ॥ ६

अस्ति तीर्थं महापुण्यं अमृताकारमद्भुतम् ।
तस्य तीर्थस्य पानेन जरामरणवर्जिताः ॥ ७

तत्रस्थाजन्तवस्सर्वे तद्रक्षास्तमलं प्रिये ।
तत्रापि च त्वया सार्धं सर्वदा निवसाम्यहम् ॥ ८

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कावेर्याश्चोत्तरे तीरे कुण्डस्थण्डिलमुत्तमम् ।
भाति तत्रोत्तरमुखः सर्वदा निवसाम्यहम् ॥ ९

मामिहैवाराजद्ब्रह्मा काशिक्षेत्रसमे पुरा ।
कुण्डस्थण्डिलनाम्नोऽस्य पूर्वस्यां दक्षिणे तटे ॥ १०

दर्विकातीर्थमाभाति तत्रापि निवसाम्यहम् ।
तस्य पूर्वे महत् क्षेत्रं मदीयं भाति सर्वदा ॥ ११

पनसादौ सुरैस्साकं त्वयापि निवसाम्यहम् ।
कावेर्या दक्षिणे तीरे त्रिशिरस्स्थानपर्वते ॥ १२

नवरत्नमयैः कुड्यैः प्रासादैरुज्ज्वले वरे ।
निवसामि सुरैस्सार्धं पश्चिमाभिमुखे सदा ॥ १३

गजारण्यमिति ख्यातं कावेर्याश्चोत्तरे तटे ।
अखिलाण्डांबया साकं ज्ञानभूमौ वसाम्यहम् ॥ १४

पुण्यं सप्तमुनिस्थानं तस्य पूर्वे विराजते ।
तस्मिन्नपि गणैस्साकं पश्चिमाभिमुखे सदा ॥ १५

निवसामि त्वया सार्धं सर्वसौभाग्यदायिनि ।
कावेर्याश्चोत्तरे तीरे स्थांडीश्वरमनुत्तमम् ॥ १६

भाति तत्रामरैस्सार्धं सर्वदा निवसाम्यहम् ।
कावेर्याश्चोत्तरेतीरे जल्पेश्वरमनुत्तमन् ॥ १७

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

तस्मिन् जल्पेश्वरे पुण्या नाम्ना पञ्चनदे शुभे ।
तत्रन्यानां च जन्तूनां मृतिकाले दयायुतः ॥ १८

अहं तारकमन्त्रस्य मर्म वक्ष्यामि सर्वदा ।
कावेर्या दक्षिणेतीरे पुण्यं पुष्पवनाभिधम् ॥ १९

तत्र वासोमरैस्साकं मम प्रियतरं प्रिये ।
कावेर्या दाक्षिणेतीरे तञ्जीश्वरमनुत्तमम् ॥ २०

आनन्दवल्लीदेव्या च त्वया सह वसाम्यहम् ।
तस्य चोत्तरभागेतु कावेर्या दक्षिणे तटे ॥ २१

श्रीकण्ठनगरे तत्र वीरस्थाने वसाम्यहम् ।
ममाभिमतमत्यन्तं मुक्तिस्थानं च तद्भुवि ॥ २२

तस्य पूर्वे महत् क्षेत्रं पवित्रं पापनाशनम् ।
श्रीशब्दपूर्वं विख्यातं नाम्ना जीवन्तिकास्थलम् ॥ २३

यत्तीर्थं श्रीवटाख्यं तत् भाति तत्र ममास्पदम् ।
सार्धं कोटिगणैर्गौरित्वया सह वसाम्यहम् ॥ २४

अन्यदत्यद्भुतं पूर्वे कावेर्या दक्षिणेतटे ।
कुम्भघोणमिति ख्यातं अस्तिक्षेत्रं महद्भुवि ॥ २५

तत्र संवसतां देवि नराणामस्ति निश्चयम् ।
हेमपद्म विचित्रं स्यात् घटिकाद्वय मात्रतः ॥ २६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नाम्ना कुम्भेश्वरस्तत्वं सप्तस्थानेश्वरावृते ।
विवसामि त्वया सार्द्धं जगतामधिनायिके ॥ २७

मरुद्वृधायास्तीरे तत् सोमेश्वरमिति श्रुतम् ।
तस्मिन् स्थले त्वया साकं निवसाम्यखिलेश्वरि ॥ २८

पट्टीश्वरमिति ख्यातं कावेर्या दक्षिणे तटे ।
तत्रापि च त्वया सार्द्धं वसामि निखिलेश्वरि ॥ २९

कावेर्या दक्षिणे तीरे विश्रुतं जगतीतले ।
स्थानं त्रिभुवनं नाम महदस्ति ममास्पदम् ॥ ३०

तस्मिन् स्थले त्वया सार्धं निवसामि महेश्वरि ।
अन्यदत्यद्भूतं गौरि ब्रह्महत्याविनाशकम् ॥ ३१

मध्यार्जुनमिति ख्यातं त्रिषु लोकेषु विश्रुतम् ।
तस्य क्षेत्रस्य माहात्म्यं कोवा वर्णयितुं क्षमः ॥ ३२

तस्मिन् स्थले महालिङ्गः निवसामि त्वया सह ।
तस्य स्वयम्भुस्थानस्य पूर्वस्यां मत्प्रियं स्थलम् ॥ ३३

महद्वधायास्तीरे तत् दक्षिणे सकलं प्रदम् ।
गोमुक्तीशमिति ख्यातं त्रिषु लोकेषु विश्रुतम् ॥ ३४

गोमुक्तीश त्वया तत्र सदाऽतुल कुचाख्यया ।
निवसामि मुदानृणां वसतां मोक्षदायकः ॥ ३५

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

आश्चर्याणि च वराणि मदीयानि विभान्त्यपि ।
ऋषीणां मण्डलं तत्र बहूनामपि वर्तते ॥ ३६

वसवोऽष्टौ च रुद्राश्च द्वादशादित्यदेवताः ।
सर्वाश्च शक्तयश्चापि तत्र गोमुक्तिशङ्करम् ॥ ३७

आराधयन्ति सिध्यर्थं मम प्रियमुमे भृशम् ।
तस्य चोत्तर भागे तु त्रिकोटीश्वरनामकम् ॥ ३८

अस्ति क्षेत्रं महापुण्यं सर्वमङ्गलदायकम् ।
निवसामि त्वया तत्र सर्वदा जगदीश्वरी ॥ ३९

मरुद्वृथातटे पूर्वदक्षिणे भीमदायके ।
मायूरमिति विख्यातं काशिक्षेत्रसमं शुभम् ॥ ४०

मम प्रीतिकरं श्रेष्टं अद्भुतं पापनाशनम् ।
तत्र देवैस्समस्तैश्च पूज्यमानपदाम्बुजः ॥ ४१

अभयाम्बिकया साकं त्वया देवी वसाम्यहम् ।
एतेषु पुण्यक्षेत्रेषु मदीयेषु सदा मम ॥ ४२

आवासो लोकरक्षार्थं तथापि श्रुणु मे वचः ।
रहस्यभूतमत्यन्तं तत् सुखावहहेतुकम् ॥ ४३

अनन्तशक्तिसहिते स्वयंलिङ्गे मनोहरे ।
उत्तरे सह्यजायाश्च पावने पपानाशके ॥ ४४

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पुण्ये प्रधानभूतेऽस्मिन् क्षेत्राणामुत्तमोत्तमे ।
वैद्यनाथस्थले प्रीतिर्गौर्यावासेति निर्मले ॥ ४५

नाम्ना श्रीगन्धकण्ठी च त्वन्मूर्तिः शुभदायिनी ।
अनन्तशक्तियुक्ता सा सर्वाभीष्टप्रदायिनी ॥ ४६

तथा श्रीगन्धकण्ठ्याहं कोशशक्तिसमाहितः ।
सर्वेषां सर्वदो नित्यं ग्रहनिग्रहसादरः ॥ ४७

स्वामी च षण्मुखस्तेषां नियन्ता रक्षसामपि ।
वसत्यनुदिनं तत्र मदाज्ञापरिपालकः ॥ ४८

त्रिषु भूरादिषु शिवे मदीयेषु पदेष्वपि ।
षष्टिकोटि सहस्रेषु प्रत्येकं शरदां शतम् ॥ ४९

शिवार्चनपराणां तु श्रेयो भवति यन्नृणाम् ।
ततोऽधिकं महच्छ्रेयः सकृद्वैद्येश्वरस्थले ॥ ५०

अचिकित्सा चिकित्सेशं सर्वाभीष्टप्रदायकम् ।
बिल्वैरर्चयतां पुंसां भवत्येव न संशयः ॥ ५१

अभिषेकं च नैवेद्यं ताम्बूलं च प्रदक्षिणम् ।
नमस्कारो जपश्चैव दानानि द्विजभोजनम् ॥ ५२

ये कुर्वन्ति नरा भक्त्या तेषां पुण्यफलं शृणु ।
रोगार्तो रोगनिर्मुक्तो नेत्रार्थी नेत्रमाप्नुयात् ॥ ५३

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पुत्रार्थी लभते पुत्रं धनार्थी धनमाप्नुयात् ।
भूतप्रेतपिशाचाद्यैः ग्रस्ताश्चेन्मनुजाः स्त्रियः ॥ ५४

तद्दोषेभ्यो विनिर्मुक्ताः सर्वान् कामानवाप्य च ।
त्रिसप्तकुलमुद्धृत्य व्रजेयुर्मत्पदं ध्रुवम् ॥ ५५

स्नात्वा सिद्धामृते गौरी गोक्षीराख्येति निर्मले ।
कल्पकाख्यं गणपतिं सर्वाभीष्टप्रदायकम् ॥ ५६

श्रीगन्धकण्ठीं त्वां मां च त्वत्पुत्रं षण्मुखं प्रिये ।
सेवन्ते ये नरा भक्त्या स्तुवन्ति स्तुतिवाङ्मयैः ॥ ५७

ते सर्वे भवरोगैश्च विनिर्मुक्ता भवन्त्यमी ।
ग्रहादिपीडया मुक्ता इति तत्र किमद्भुतम् ॥ ५८

प्राप्नुवन्ति परां मुक्तिं भुक्त्वा भोगाननेकशः ।
वैद्यनाथस्थले पूजां विशेषात् कल्पयन्ति ये ॥ ५९

मदास्थाननिवासास्ते कल्पे कल्पे भवन्त्यहो ।

अगस्त्यः —

तच्छ्रुत्वा वचनं तस्य पार्वती जगदम्बिका । ६०

आनन्दाम्बुधिकल्लोलस्वान्तरा गिरिजा तदा ।
पादाब्जं परमेशस्य प्रणनाम मुहुर्मुहुः ॥ ६१

प्रोवाच गिरिजा शम्भुं सर्वाभीष्टप्रदायकम् ।

देवी —

शिवशम्भो महादेव ममानन्दकरेश्वर ॥ ६२

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अनन्तशक्तिसहिता चाप्सरोभिः समावृता ।
वैद्यनाथस्थले वस्तुं त्वया सार्द्धं महेश्वर ॥ ६३

वाञ्च्छामि वाञ्च्छितार्थानां दायक श्रीमहेश्वर ।
इति संप्रार्थितो गौर्या शिवं आह यथेच्छया ॥ ६४

शिवः —

तथास्तु गौरि भद्रं ते गच्छ शक्तिभिरादरात् ।
वैद्यनाथस्थले पुण्ये मामर्चय सुहृद्गणैः ॥ ६५

अहं प्रत्यक्षभूतस्सन् वरं दास्ये परिग्रहम् ।
चतुःषष्टिकलाख्येषु पीठेषु मधुरादिषु ॥ ६६

त्वत्पदेषु प्रियं गौरि वैद्यनाथस्थलं मम ।
इति शम्भोर्वरान् गौरी कैलासावनि शेखरात् ॥ ६७

वैद्यनाथस्थलं गन्तुं समुद्युक्ताऽभवद्द्विजाः ॥ ६८

अगस्त्यः —

श्रीशम्भोर्मुखमण्डलाद्विगलितं शैवं चरित्रं पुनः
ये शृण्वन्ति च मानवा भुवि परन्ते पुत्रपौत्रादिकान् ।
आयुर्दीर्घमरोगतामपि सदाश्वर्याख्यमव्याहतं
संप्राप्यान्तिमकाल एव नितरां निश्रेयसं प्राप्नुयुः ॥ ६९

इत्यगस्त्यवचः श्रुत्वा ते सर्वे मुनिपुङ्गवाः ।
प्रमोदं प्राप्नुयुस्तत्र शुभदे मलयाचले ॥ ७०

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ततस्ते मुनयस्सर्वे बद्धाञ्जलि पुटास्तदा ।
पप्रच्छुरादरेणैव पुनस्तं कुम्भसम्भवम् ॥ ७१

इति श्रीशैवपुराणे कोटिरुद्रसंहितायां उत्कृष्टशिवक्षेत्रप्रकरणे श्रीवैद्यनाथस्थानमाहात्म्ये चतुर्थोऽध्यायः ॥

॥ पञ्चमोऽध्यायः ॥

अगस्त्यः –

अथ गौरी जगन्माता सर्वभूतहिते रता ।
प्रदक्षिणैर्नमस्कारैस्तोषयित्वा महेश्वरम् ॥ १

स्तुत्वा स्तुतिशिरोभिश्च बद्धाञ्जलिपुटा ततः ।
अनुज्ञाप्य महेशानं भगवन्तं पुनः पुनः ॥ २

स्वामिन् दयानिधे तत्र वैद्यनाथस्थले मम ।
यत्त्वयाज्ञा प्रदत्ता हि शीघ्रं गच्छाम्यहं प्रभो ॥ ३

इत्युक्त्वा निर्जगामासौ तस्माद्रौप्याचलाच्छिवा ।
चतुःषष्टिकलाकारा सर्वलक्षणसंयुताः ॥ ४

शक्तिभिः कोटिसंख्याभिः अनेकाभिस्समन्विता ।
नवरत्नमयं दिव्यं विमानमधिरुह्य च ॥ ५

निर्याणतूर्यसम्भिन्नसर्वदिगण्डकुण्डिका ।
अकुतोभववाणीभिर्वेत्रहस्ताभिरद्भुतम् ॥ ६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मातर्जय जयेत्येवं सेव्यमानपदाम्बुजा ।
इन्द्रादिभिश्च दिक्पालैः ब्रह्मविष्णुमुखामरैः ॥ ७

बद्धाञ्जलिपुटैस्सर्वैः देवबृन्दैर्नमस्कृता ।
अनेककोटिसंख्याकैर्ध्वजैश्छत्रैस्समन्विता ॥ ८

मणिचामरबृन्दैश्च वीज्यमानपदांबुजा ।
गीयमाना विपञ्च्या च सरस्वत्या च वाङ्मयैः ॥ ९

श्रिया वाङ्मिश्रणं कृत्वा लसन्ती गगनान्तरे ।
अप्सरोभिरनेकाभिः नृत्यमानदिगन्तरा ॥ १०

बृन्दारबृन्दसङ्कीर्णा पुष्पवृष्ट्या समर्चिता ।
वसुभिर्द्वादशादित्यै मरुद्भिरपि सेविता ॥ ११

नारदाद्यैर्मुनीन्द्रैश्च स्तूयमाना पुनः पुनः ।
गन्धर्वैश्चारणैस्सिद्धैः तथा किन्नरजातिभिः ॥ १२

यक्षैश्च पन्नगैश्चैव बद्धाञ्जलिपुटैस्तदा ।
अनेककोटिसंख्याकैरावृता जगदीश्वरी ॥ १३

मेरोर्दक्षिणपार्श्वस्थं केदारक्षेत्रमुत्तमम् ।
आगत्य तत्र केदारनायकं जगतीपतिम् ॥ १४

आनम्य शतशस्तत्र समभ्यर्च्य जगत्पतिम् ।
ततो वाराणसीं प्राप्य गङ्गातीरविराजितम् ॥ १५

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

विश्वेश्वरं महादेवं विरूपाक्षं दयानिधिम् ।
अभ्यर्च्य देवदेवेशं अखण्डानन्दविग्रहम् ॥ १६

यत्र देवो महादेवो जन्तूनां सर्वदा पुनः ।
तारकब्रह्म सर्वेषां उपदेष्टा विराजते ॥ १७

तां राजधानीं शैवां च दृष्ट्वा दृष्ट्वा पुनः पुनः ।
आनन्दसागरोन्मग्नचिन्तामत्तेभगामिनी ॥ १८

अनुज्ञाप्य महेशानं विश्वेशं जगतीपतिम् ।
ततस्तु नैमिशारण्यं गत्वा नत्वा महेश्वरम् ॥ १९

तत्रत्यान् ऋषिसन्घांश्च समनुज्ञाप्य पार्वती ।
कुरुक्षेत्रं ततो गत्वा नत्वा तत्रत्यमीश्वरम् ॥ २०

अर्चयित्वा महेशानं स्तुत्वा स्तुत्वा च वाङ्मयैः ।
अनुज्ञाप्य महादेवं तत्र श्रीशैलमुत्तमम् ॥ २१

श्रीशैलशिखरे देवमम्बिकारमणं प्रभुम् ।
अर्चयित्वा ततो नत्वा स्तुत्वा श्रुतिभिरव्ययम् ॥ २२

तमनुज्ञाप्य देवेशं कालहस्तिस्थलं महत् ।
अभिषेकक्रियाभिस्तां सुवर्णमुखरी नदीम् ॥ २३

अनुग्राह्य महादेवं कालहस्तीश्वरं प्रभुम् ।
पूजयित्वा यथान्यायमर्चयित्वा पुनः पुनः ॥ २४

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ततः काञ्चीपुरीं प्राप्य कल्याणगुणदायिनीम् ।
एकाम्रतपतिं नत्वा स्तुत्वा स्तोत्रैरनेकशः ॥ २५

विरिञ्चिपुरमासाद्य विरिञ्चाद्यैरभिष्टुता ।
पूजयित्वा यथाशास्त्रं अर्चयित्वा पुनः पुनः ॥ २६

ततोऽरुणाद्रिमासाद्य तत्र देवमुमापतिम् ।
पूजयित्वा महादेवं अवाङ्मनसगोचरम् ॥ २७

ततो वृद्धगिरिं प्राप्य तत्र देवं दयानिधिम् ।
अर्चयित्वा जगन्माता जगतामधिनायिका ॥ २८

शैवानां कर्मणां लोके पदं तत्चित्सभान्तरम् ।
संप्राप्य शिवगङ्गायां स्नात्वा शक्तिभिरावृता ॥ २९

गौरी रक्ताम्बरं धृत्वा भस्मोद्गलितविग्रहा ।
रुद्राक्षमणिसम्बद्धमुक्तामालविभूषिता ॥ ३०

स्थानेश्वरान् शुभाकारान् सुसेव्य समनुक्रमात् ।
पश्चाद्धेमसभां गत्वा नत्वा कैलासनायकम् ॥ ३१

पूजयित्वा यथान्यायं चिन्मयाविष्टचेतसा ।
तस्यां सभायां देवेशमानन्दनटनादरम् ॥ ३२

नानातूर्यान्तसिद्धान्तरहस्यार्द्धाकृतिं प्रभुम् ।
अनुज्ञाप्य जगन्नाथमानन्दाश्रुमुखाम्बुजा ॥ ३३

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सर्वैश्च शक्तिसन्धैश्च सहैव जगदीश्वरी ।
ततो ब्रह्मपुरीं प्राप्य श्रीकालीस्थानमुत्तमम् ॥ ३४

रहस्यकालीं संसेव्य विमानस्था ततःपरम् ।
ददर्श च शुभं गौरी वैद्यनाथस्थलं महत् ॥ ३५

तप्तहेममयैः कान्तैर्गोपुरैः वृषलाञ्छनैः ।
प्राकारैर्मणिचित्रैश्च मण्डपैरपि मण्डितम् ॥ ३६

कल्पवृक्षसमाकीर्णं जातीमन्दारशोभितम् ।
नालिकेराम्रबिल्वाढ्यं मल्लिकामालतीयुतम् ॥ ३७

पनसैः पाटलैश्चूतैः पुन्नागैरपि शोभितम् ।
पुष्पितैः फलितैर्वृक्षैः संवृतं वकुलोन्नतम् ॥ ३८

कावेरीवायुगन्धाढ्यं कदलीसंवृतं शुभम् ।
सर्वाभिः शक्तिभिस्सेव्य त्रिभिरावरणैर्युतम् ॥ ३९

पुण्यतीर्थास्पदं सिद्धैः मुनिसंघैस्तपश्चरैः ।
शैवागमज्ञैरखिलैः कामधेनुगणैर्वृतम् ॥ ४०

वैद्यनाथस्थलं वीक्ष्य रोमाञ्चिततनूरुहा ।
विमानादवरुह्येशं प्रणिपत्य पुनः पुनः ॥ ४१

पादचारेण सा देवी पद्माक्षी जगदीश्वरी ।
पुनर्नत्वा पुनर्नत्वा पुनर्नत्वा पुनः पुनः ॥ ४२

வை. - 5

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

आनन्दाश्रुसमाविष्टनेत्रोत्पलसुशोभिता ।
मन्दं मन्दं समागम्य गौरी वेदपुरन्तथा ॥ ४३

प्राविशद्वैद्यनाथस्य चालयं करूणालयम् ।
ददर्श तत्र गोक्षीरनामकं तीर्थमद्भुतम् ॥ ४४

हंसकारण्डवाकीर्णं चक्रवाकगणैर्युतम् ।
तटसंरूढबिल्वालिच्छायामण्डलमण्डितम् ॥ ४५

अर्थतो नामतश्चापि गोक्षीरमति निर्मलम् ।
पङ्कजैरपि कल्हारैः कुमुदानां गणैरपि ॥ ४६

शैवालपङ्क्तिभिश्चापि झषानां मण्डलैरपि ।
आकीर्णा तदनुप्राप्य मणिसोपानमण्डितम् ॥ ४७

सर्वाभिः शक्तिभिस्साकं विशन्ति स्नानवाञ्छया ।
गङ्गाद्यास्सरितस्तस्मिन् सस्मार गिरिजा तदा ॥ ४८

गङ्गा च स्मृतिमात्रेण सर्वतीर्थैश्च संयुता ।
मूर्तिमद्भिस्सरिच्छ्रेष्ठैः सर्वपातकनाशकैः । ४९

नदैश्च सकलैस्साकं सखीभिर्नर्मदादिभिः ।
सहसा सहसा देव्याः पुरस्तादभवत्तदा ॥ ५०

सापि साक्षात्कृतां गङ्गां गोक्षीरजलमध्यगाम् ।
दृष्ट्वा स्तुत्वा च वैद्येशं नत्वा हृदि तदाम्बिकाम् ॥ ५१

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

स्नात्वा श्वेताम्बरं धृत्वा भस्मरुद्राक्षभूषिता ।
मुक्ता हारादिभिर्दिव्यैः प्रवालैरपि मण्डिता ॥ ५२

अङ्गुष्ठमालिकां हेमरञ्जितां सुमनोहराम् ।
धारयन्ती जपन्ती सा गौरी भाग्यप्रदायिनी ॥ ५३

शैवीं पञ्चाक्षरीं सम्यगष्टोत्तरसहस्रकम् ।
रत्नसिंहासनारूढे दिव्यतेजोमये शुभे ॥ ५८

लिङ्गे मरतके रम्ये दहरान्तस्थमीश्वरम् ।
ध्यात्वा सदाशिवं देवं चन्द्रार्धकृतशेखरम् ॥ ५५

नीलकण्ठं विरूपाक्षं आवाह्य विधिना तदा ।
अर्घ्यपाद्यादिभिस्सर्वैः मधुपर्कपुरस्सरैः ॥ ५६

पञ्चामृतैः पञ्चगव्यैरिक्षुसारैर्मनोहरैः ।
दधिक्षौद्रयुतक्षीरैः पनसाम्रफलैरपि ॥ ५७

नालिकेरोदकैः शुद्धैस्तैलैर्गोधूमचूर्णकैः ।
बिल्वोदकैर्गन्धसारैरमृतैरिन्दुसम्भवैः ॥ ५८

अभिषिच्य महादेवं शङ्खाद्भिर्मन्त्रपूर्वकम् ।
ततो दिव्याम्बरैर्यज्ञसूत्रैः सौवर्णकैरपि ॥ ५९

दिव्यगन्धैर्दिव्यमाल्यैर्दिव्यभूषणमण्डलैः ।
दिव्यैस्तिलाक्षतैश्चैव दिव्यबिल्वदलैरपि ॥ ६०

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

दिव्यहारलताभिश्च समलङ्कृत्य भक्तितः ।
धूपैर्दीपैश्च नैवेद्यैः षड्रसैः कदलीफलैः ॥ ६१

अपूपैः पायसैश्चैव प्रीणयित्वा महेश्वरम् ।
कर्पूरपरिमृष्टानि ताम्बूलमुकुलान्यपि ॥ ६२

विनिवेद्य तदा भक्त्या प्रदक्षिणमथाकरोत् ।
ततो गौरी नमस्कृत्य स्तुत्वा तूर्यं च वाङ्मयैः ॥ ६३

विमले दहराकाशे लिङ्गात् संयोज्य शङ्करम् ।
पूजां समाप्य विधिवत् शक्तिभिस्सह पार्वती ॥ ६४

देवालयं समागम्य गणादीन् परितोष्य च ।
तत्र श्रीगन्धकण्ठीं तां वैद्यनाथं च भक्तितः ॥ ६५

संसेव्य पञ्चगव्याद्यैः कदल्याम्रफलैरपि ।
नालिकेरोदकैः शुद्धैर्वस्त्रपूतैस्सुशीतलैः ॥ ६६

कावेरीपुष्करैः किञ्च गङ्गादिसरितां जलैः ।
तत्रत्यैस्सप्ततीर्थैश्च वैद्यनाथं महेश्वरम् ॥ ६७

कृष्णश्रीगन्धकण्ठीं तां अभिषिच्य च बालिकाम् ।
दिव्यैश्च चन्द्रसङ्काशैर्दुकूलैस्सुमनोहरैः ॥ ६८

दिव्योपवीताभरणैः गन्धैः पुष्पैर्मनोहरैः ।
धूपदीपैश्च नैवेद्यैः नानाविधरसायनैः ॥ ६९

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कर्पूरचूर्णसंयुक्तैः पूगीफलसमन्वितैः ।
नागवल्लीदलैश्चैव ताम्बूलैः स्वर्णपुष्पकैः ॥ ७०

च्छत्रैश्च चामरैश्चैव दर्पणप्रमुखैरपि ।
नीराजनैर्मन्त्रपुष्पैः भिषगीशानमीश्वरम् ॥ ७१

कृष्णश्रीगन्धकण्ठीं तामेवमेवोपचारकैः ।
प्रीणयित्वा महादेवी सखोभिश्शक्तिभिस्सह ॥ ७२

भक्त्या परमया युक्ता प्रपक्षिणमथाकरोत् ।

ततो हिमाद्रेस्तनया प्रणम्य
सहस्रशो वाग्भिरनन्यसम्भवैः ।
श्रीवैद्यनाथं जगतां सवित्रीं
स्तोतुं समारब्धवता मुनीशाः ॥

इति श्रीशैवपुराणे कोटिरुद्रसंहितायां उत्कृष्टशिवक्षेत्रप्रकरणे
श्रीवैद्यनाथस्थानमाहात्म्ये पञ्चमोऽध्यायः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

॥ षष्ठोऽध्यायः ॥

अगस्त्यः —

गौरी कृताञ्जलिपुटा वैद्यनाथं दयानिधिम् ।
कृष्णा श्रीगन्धकण्ठी च तुष्टावैवं गिरीन्द्रजा ॥ १

ऋताय ते नमस्तुभ्यं सत्याय सततं नमः ।
पराय ब्रह्मणे तुभ्यं पुरुषाय नमो नमः ॥ २

कृष्णपिङ्गलनाम्ने ते नमस्तुभ्यं नमो नमः ।
किञ्चोर्ध्वरेतसे तुभ्यं विरूपाक्षाय ते नमः ॥ ३

विश्वरूपाय वै तुभ्यं श्रुतिरूपाय ते नमः ।
दिव्यलिङ्गस्वरूपाय दिव्यशक्तिमते नमः ॥ ४

गुणत्रयनिदानाय गुणातीताय ते नमः ।
भवरोगादिसक्तानां पुरुषाणां दिवौकसाम् ॥ ५

आसुरामयभीतानां विष्णोर्मदनरोगिणाम् ।
चिकित्सकाय क्षेत्रेऽस्मिन् प्राप्ताय रजताचलात् ॥ ६

मूर्तिमद्भिर्मन्त्रगणैर्महद्भिः कोटिभिस्सदा ।
उपास्याय नमस्तुभ्यं निर्गुणाय नमो नमः ॥ ७

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीरामसौमित्रिजटायुवेद्
षडाननादित्य कुजार्चनाय ।
श्रीनीलकण्ठाय दयामयाय
श्री वैद्यनाथाय नमश्शिवाय ॥ ८

गङ्गाप्रवाहेन्दुजटाधराय
त्रिलोचनाय स्मरकालहन्त्रे ।
समस्तदेवैरपि पूजिताय
श्री वैद्यनाथाय नमःशिवाय ॥ ९

भक्तप्रियाय त्रिपुरान्तकाय
पिनाकिने दुष्टहराय नित्यम् ।
प्रत्यक्षलीलाय मनुष्यलोके
श्री वैद्यनाथाय नमःशिवाय ॥ १०

प्रभूतवातादिसमस्तरोग-
प्रणाशकर्त्रे मुनिवन्दिताय ।
प्रभाकरेन्द्वग्निविलोचनाय
श्री वैद्यनाथाय नमःशिवाय ॥ ११

वाक्श्रोत्रनेत्राङ्घ्रिविहीनजन्तोः
वाक्श्रोत्रनेत्राङ्घ्रिसुखप्रदाय ।
कुष्ठादिसर्वोन्नतरोगहन्त्रे
श्री वैद्यनाथाय नमःशिवाय ॥ १२

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वेदान्तवेद्याय जगन्मयाय
योगीश्वराध्येय पदाम्बुजाय ।
आत्मस्वरूपाय शरीरभाजां
श्री वैद्यनाथाय नमःशिवाय ॥ १३

स्वतीर्थमृद्भस्मभृदङ्गभाजां
पिशाचदुःखार्तिभयापहाय ।
श्रीमूर्तिरूपाय सहस्रनाम्ने
श्री वैद्यनाथाय नमःशिवाय ॥ १४

श्रीनीलकण्ठाय वृषध्वजाय
स्रगन्धभस्माद्यभिशोभिताय ।
सुपुत्रदारादिसुभाग्यदाय
श्री वैद्यनाथाय नमःशिवाय ॥ १५

अणिमाद्यष्टसिद्धीनां धनधान्यादि नायक ।
निधिदानपटो शम्भो चतुःषष्टिकलाप्रद ॥ १६

कृपानिधे नमस्तुभ्यं जगद्रक्षणदीक्षितः ।
इति स्तुतो वैद्यनाथो वृषारूढो महेश्वरः ॥ १७

आविरासीत्तदा शम्भुः करुणावरुणालयः ।
तदानीं गिरिजा तुष्टा सानन्दाश्रुमुखाम्बुजा ॥ १८

प्रादुर्भूतं महादेवं दयासिन्धुं जगत्पतिम् ।
कृष्णश्रीगन्धकन्या च सहितं सुन्दराकृतिम् ॥ १९

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

त्रिणेत्रं शशिचूडालं कोटिमन्मथविग्रहम् ।
दधतं तपनं शूलं अभयं डमरुं तथा ॥ २०

लसदष्टमहानागभूषणोरस्कमव्ययम् ।
शक्तिभिर्विविधाभिश्च अप्सरोभिश्च वन्दितम् ॥ २१

गणाधिपेन स्कन्देन भद्रकाल्यादिभिर्वृतम् ।
शक्तादिभिर्लोकपालैरर्च्यमानपदाम्बुजम् ॥ २२

प्रपञ्चैर्वन्दितं कान्तं नीलकण्ठं वृषध्वजम् ।
वीजितं चामराभ्यां च भस्मरुद्राक्षमण्डितम् ॥ २३

तरुणं रूपसम्पन्नं वैद्यनाथं महेश्वरम् ।
गौरी वीक्ष्य तदानन्दं प्राप्य तस्य पदाम्बुजम् ॥ २४

अनमद्वैद्यनाथस्य भक्तियुक्ता मुनीश्वराः ।
गौरीं तां करपद्माभ्यामालिङ्ग्योद्धृत्य शङ्करीम् ॥ २५

वैद्यनाथोऽवदत्प्रीत्या गौरीमिति दयानिधिः ।
वृणु गौरि वरं तेऽद्य ददामि गिरिनन्दिनि ॥ २६

इत्युक्ता वैद्यनाथेन प्रीत्या चोत्थाय नायकम् ।
पप्रच्छा वैद्यनाथं तं वरं गौरी जगद्धितम् ॥ २७

गौरी–

वैद्यनाथ महादेव त्वयि भक्तिमचञ्चलाम् ।
देहि देवत्वया सार्द्धं वस्तुमिच्छामि सर्वदा ॥ २८

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

किं चास्ति मे दयासिन्धो याचनीयं ममाऽधुना ।
वैद्यनाथस्थले ये त्वां स्नात्वा गोक्षीरपुष्करे ॥ २९

हल्लकैः कुसुमैरन्यैः अर्चयन्ति विशेषतः ।
पुत्रपौत्रादिभिस्साद्धं भुक्त्वा भोगाननेकशः ॥ ३०

भवपाशविनिर्मुक्ताः त्वत्सायुज्यं लभन्तु ते ।
मया कृतमिदं स्तोत्रं अष्टसङ्ख्याख्यासु पूरितम् ॥ ३१

ये पठन्ति नरा भक्त्या ते यान्तु परमां गतिम् ।
तथैवास्तु त्वया गौरि प्रार्थितान्यखिलान्यपि ॥ ३२

वैद्यनाथोऽपि सुप्रीतः पुनराहाम्बिकामिति ।
पुरा देवासुराणां च बभूव रणमम्बिके ॥ ३३

वर्षाणामयुतं भीममसुरास्त्वहतास्सुरैः ।
भार्गवं शरणं प्राप्य क्षुद्रमार्गं ततोगमन् ॥ ३४

ततस्ते पुनरागम्य युद्धभूमिं सुरानिमान् ।
बाणाग्रे क्षुद्रमन्त्राणि प्रयुज्य क्षुद्ररोगिणः ॥ ३५

कृत्वाद्भुतं तदीयं च पदं प्राप्य मुदं ययुः ।
ततस्ते सुरसङ्घाश्च बलारिप्रमुखाः पुनः ॥ ३६

पदभ्रष्टाः खिन्नमुखा विहीनाश्शरणेन च ।
कुत्रापि शान्तिकर्तारं तस्य रोगस्य भूतले ॥ ३७

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अलब्ध्वा चिन्तया युक्तास्त्वशरीरवचोऽमृतम् ।
पीत्वा श्रोत्रपुटाभ्यां तु तदाज्ञावशवर्तिनः ॥ ३८

दीना दिष्ट्या परं प्राप्ताः शक्तिपीठमिमं प्रिये ।
ततोऽस्मदालयं प्राप्य मद्दर्शनकुतूहलात् ॥ ३९

मां दृष्ट्वा पूर्वपुण्येन शुभेन शुभमानसाः ।
कृष्णश्रीगन्धकण्ठ्या च सहितं विधिवत्तदा ॥ ४०

पूजयित्वाऽथ नत्वा च स्तुत्वा स्तुत्वा पुनः पुनः ।
प्रदक्षिणसहस्राणि क्षुद्ररोगार्तिशान्तये ॥ ४१

अकुर्वन् ते त्वतिक्लिष्टा भक्तितो मण्डलावधि ।
ततो मदाज्ञया देवा मत्प्रभावसमुद्भवे ॥ ४२

शक्तिगङ्गाभिधे तीर्थे दर्शनादिष्टदायके ।
गोक्षीरनाम्नि विधिवत् क्षीरसागरसन्निभे ॥ ४३

स्नात्वाऽऽचम्य ततः पीत्वा तत्रत्यानृषिसत्तमान् ।
गोभिरश्वैर्गजैर्दिव्यैर्धनधान्यादिभिः पुनः ॥ ४४

षड्रसैः सहितैरन्नैरपूपैः पायसैः पुनः ।
दिव्यैः फलैः कन्दमूलैर्दध्निक्षीरादिभिस्तथा ॥ ४५

ताम्बूलैर्दक्षिणाभिश्च तोषयित्वा पुनः पुनः ।
ततो ब्राह्मणपूजाभिस्तृप्तं मां प्राप्य ते सुराः ॥ ४६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नत्वा स्तुत्वा पुनर्नत्वा नत्वा स्तुत्वा पुनः पुनः ।
क्षुद्ररोगाद्विनिर्मुक्ता दैत्यान् जित्वा मदाज्ञया ॥ ४७

स्वं स्वं पदं समापन्ना बभूवुस्सुखजीविनः ।
रोगार्तानां तु देवानां भेषजं कृतवान् यतः ॥ ४८

तदारभ्य तु मां देवि भिषगीशं वदन्ति हि ।
अतो देवि महाभागे सर्वलोकैक वन्दिते ॥ ४९

शक्तिगङ्गाभिधे तीर्थे ये स्नानमरुणोदये ।
कुर्वन्ति प्राणिनो भक्त्या ते यान्ति परमां गतिम् ॥ ५०

किं चैतन्मम माहात्म्यं ये शृण्वन्ति मुदान्विताः ।
सर्वरोगविनिर्मुक्तास्तेसर्वेमुक्तिमवाप्नुः ॥ ५१

ततो देवो महादेवश्चन्द्रार्धकृतशेखरः ।
प्रीत्या परमया युक्तस्तामालिङ्ग्य पुनः पुनः ॥ ५२

कृष्णश्रीगन्धकण्ठ्या संयोज्य जगतीपतिः ।
अर्द्धाङ्गे स्थापयित्वा तामर्द्धनारीश्वरोऽभवत् ॥ ५३

ततस्तां प्रत्युवाचेदं सर्वलोकमहेश्वरः ।
हे बाले जगतां वन्द्ये मम प्रियतरे शुभे ॥ ५४

अद्य प्रभृति त्वां देवि बालाम्बेति वदन्त्विह ।
सर्वे मन्त्राश्च मुनयस्सर्वे देवास्तथाऽसुराः ॥ ५५

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

किञ्च मां भिषगीशं त्वां स्कन्द कल्पगणेश्वरम् ।
गणनाथं च शास्तारं भद्रकालीं महेश्वरीम् ॥ ५६

एतानि सप्त तीर्थानि सर्वपापहराणि च ।
ये सेवन्ते नरा भक्त्या ब्राह्मणान् वेदपारगान् ॥ ५७

सर्वे रोगविनिर्मुक्तास्ते सर्वे मुक्तिमाप्नुयुः ।
इत्युक्त्वा देवदेवशस्तया साकं मुनीश्वराः ॥ ५८

वरांश्च सर्वजन्तूनां ददत्तत्र महेश्वरः ।
एतदाख्यानमव्यग्रमनन्तफलदं शुभम् ॥ ५९

ये शृण्वन्ति नरा भक्त्या शिवसायुज्यमाप्नुयुः ॥ ६०

श्रुत्वा तत् भिषगीश्वरस्य तुमुलं माहात्म्यमत्यादरा-
दानन्दाब्धिनिमज्जनान्तरमलं सर्वे मुनीन्द्रास्तथा ।
अन्यं श्रोतुमिदं मुनीन्द्रसहसा सन्नह्य तिष्ठन्त्यहो-
श्रोतृणां निवहाः परन्तु भवतस्तस्माद्वदस्वाधुना ॥ ६१

इति श्रीशैवपुराणे कोटिरुद्रसंहितायां उत्कृष्टशिवक्षेत्रप्रकरणे
श्रीवैद्यनाथस्थानमाहात्म्ये षष्टोऽध्यायः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

॥ सप्तमोऽध्यायः ॥

अगस्त्य उवाच —

अन्यच्छृणुध्वं वक्ष्यामि वैद्यनाथस्य वैभवम् ।
शृण्वतां सर्वपापघ्नं भक्तियुक्ता मुनीश्वराः ॥ १

विधयः कोटयः पूर्वं अचिकित्साः चिकित्सकम् ।
आराध्य सकलान् कामान् प्रापुः शम्भोः प्रसादतः ॥ २

श्रीषण्णवतितत्त्वार्थमतीतस्त्रिगुणात्मकः ।
दक्षिणाङ्गाद्विधिं सृष्ट्वास्वस्मिन् धाम्न्यवसच्छिवम् ॥ ३

दशवर्षःसहस्राणि विधिश्चक्रे तपो महत् ।
तपसा तोषितः शम्भुः विधिं प्राहाम्भया सह ॥ ४

विधे ते तपसा दास्ये प्रीतोऽहं वरमादरात् ।
तवाभीष्टं वृणु ब्रह्मन् सर्वलोकहिताय वै ॥ ५

इत्युक्तश्शम्भुना ब्रह्मा वरं वव्रे सदाशिवम् ।
कृताञ्जलिपुटः शम्भुं प्राह गम्भीरया गिरा ॥ ६

जगन्नाथ महेशान नमस्ते भक्तवत्सल ।
जगतां सृष्टये देहि सामर्थ्यं परमेश्वरः ॥ ७

विधिना प्रार्थितः शम्भुरवदत् कमलासनम् ।
पुरं पूर्वपदंब्रह्मन् गृध्रऋक्स्कन्दभास्करान् ॥ ८

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मनःप्रीतिकरं तत्र भारत्या सह गम्यताम् ।
वरं ददामि तत्रैव कैलासाचलसन्निभे ॥ ९

इत्युक्तः शम्भुना ब्रह्मा प्रणम्य परमेश्वरम् ।
कैलासान्निर्गतो देवैःस्तूयमानो मुनीश्वरः ॥ १०

हंसारूढः शिवक्षेत्राण्यालोकयदनेकशः ।
केदारेशं विश्वनाथं कालहस्तीशमव्ययम् ॥ ११

नत्वा स्तुत्वा महेशानं तत्र तत्र स्थलेषु च ।
ततो निर्गत्य सन्तुष्टो भारत्या सहितो विधिः ॥ १२

एकचूतपतिं नत्वा ततो व्याघ्रपुरं महत् ।
आगत्य पूजयित्वेशं निर्गतः कमलासनः ॥ १३

रहस्यकाशीं संसेव्य प्राप वद्येश्वरस्थलम् ।
प्रणम्य गणनाथादीन् गोक्षीराख्ये दृढव्रतः ॥ १४

तीर्थे स्नात्वोत्थितो भक्त्या धृत्वा वस्त्रं समाहितः ।
भस्मोद्धूलितसर्वाङ्गः त्रिपुड्रांकितमस्तकः ॥ १५

सन्ध्यां समाप्य विधिवत् गायत्रींश्च षडक्षरम् ।
जप्त्वा देवालयं प्राप्य गणेशं स्कन्दमिष्टदम् ॥ १६

कृष्णश्रीगन्धकण्ठीं च संसेव्य तदनन्तरम् ।
अनादि वैद्यमीशानं प्राप्तवान् शरणं विधिः ॥ १७

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सपर्यां विधिवत् कृत्वा बिल्वपत्रैस्समर्चयत् ।
ततोऽस्तुवद्वैद्यनाथमभीष्टार्थप्रदायकम् ॥ १८

अनादिर्वैद्यदेवेश क्व चिकित्साचिकित्सक ।
जटायुनाथ गौरीश नमस्ते नृत्तसुन्दर ॥ १९

कृष्णश्रीगन्धकण्ठीश बालिकापतये नमः ।
इति स्तुत्वा विरिञ्चिस्तं वैद्यनाथं दयानिधिम् ॥ २०

कृताञ्जलिपुटोऽतिष्ठत् सरस्वत्या मुदान्वितः ।
तस्य स्तोत्रेण सन्तुष्टः श्री वैद्येशकृपानिधिः ॥ २१

देव्या बालिकया सार्धं आविरासीद्विधेःपुरः ।
वरं वृणु सुभद्रं ते प्रीतोऽस्मि तव पूजनात् ॥ २२

इत्युक्तो भिषगीशेन वरं वव्रे जगद्धितम् ।

ब्रह्मा —

सामर्थ्यं जगतां सृष्टौ त्वं देहि जगतीपते ॥ २३

बिल्वैः कल्हारकुसुमैर्येऽर्चयन्ति महेश्वर ।
त्वत्पादाम्बुजयोर्भक्त्या पुमर्थांश्च लभन्तु ते ॥ २४

इति संप्रार्थितो धात्रा सृष्टौ सामर्थ्यमीश्वरः ।
दत्वा प्राह पुनः शम्भुः ब्रह्माणं मुनिसत्तमाः ॥ २५

मामर्चयन्ति ये भक्त्या बिल्वैः कल्हारपङ्कजैः ।
धर्मार्थकाममोक्षाश्च तेषां सन्तु मुनीश्वराः ॥ २६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

एवं दत्वा विधेशशम्भुः वैद्यनाथःकृपानिधिः ।
कृष्णश्रीगन्धकण्ठ्या च सह सर्वार्थदायकः ॥ २७

कावेर्याश्चोत्तरे तीरे भिषगीशो विभात्यहो ।
वैद्यनाथाद्वरं प्राप्य भारत्या सह विश्वसृक् ॥ १८

हंसारूढः पुनः प्राप्य सत्यलोकं मुनीश्वराः ।
सृष्ट्वा लोकान् विरिंचोऽथ पञ्चास्यमदगर्वितः ॥ २९

सदृशोऽहं शङ्करस्य पञ्चास्यास्य महात्मनः ।
पीडयामास सर्वाणि जगन्ति विविधानि च ॥ ३०

तं दृष्ट्वा गर्वितं शम्भुः स्मित्वा किञ्चिन्महेश्वरः ।
तस्य तत्पञ्चमम् कोपात् नखेन व्यलुनच्छिरः ॥ ३१

ततो वेदनया युक्तो गतोद्धतबलो विधिः ।
भिषगीशस्थलं प्राप्य पुनर्नमितगन्धरः ॥ ३२

गोक्षीरमज्जनं कृत्वा भिषगीशमपूजयत् ।
यथोक्तेन विधानेन बिल्वपत्रैस्समर्चयत् ॥ ३३

अथाविरासीद्वैद्येशो ब्रह्मणोऽग्रे दयानिधिः ।
तोषितोऽस्मि विरिञ्चाद्य वरं व्रणु च सुव्रत ॥ ३४

अद्यप्रभृति लोके त्वां चतुर्मुखविधिं विदुः ।
इत्युक्तो वैद्यनाथेन वरं वव्रे ततो विधिः ॥ ३५

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

निर्वेदनोऽहं शम्भोऽत्र यष्टुमिच्छामि सांप्रतम् ।
आज्ञां कुरुत मे स्वामिन् त्वद्भक्तस्य कृपानिधे ॥ ३६

प्रार्थितो ब्रह्मणा शम्भुर्यजेति च तिरोदधे ।
अग्निभागे विरिञ्चोऽथ गङ्गां संसार पावनीम् ॥ ३७

कुण्डे प्रत्यक्षभूतोऽभूत् सापि गङ्गा सखीवृता ।
पुण्ये कुण्डेऽत्र गङ्गायां स्नात्वा ब्रह्मा अयजत्ततः ॥ ३८

अस्तुवत् स्तोत्रबृन्देन वैद्यनाथं महेश्वरम् ।
वैद्यनाथ महादेव मणिमन्त्रौषधेश्वर ॥ ३९

नमस्ते देवदेवेश भक्तवत्सल ते नमः ।
भिषगीशः स्तवेनास्य प्रादुर्भूतो महेश्वरः ॥ ४०

सुप्रसन्नोऽग्रहीद्देवो हविर्भागं विधेः करात् ।
ततो देवाश्च मुनयो हवींषिञ्जगृहुस्ततः ॥ ४१

ब्रह्माध्वरे समाप्ते तु सर्वे देवास्समागताः ।
नराश्च मुनयश्चैव सस्नुरावभृधे तदा ॥ ४१

पितरोऽपि च तं दृष्ट्वा गयास्नानाद्यथा तथा ।
तृप्तिं प्राप्ता महाभागा विस्मयं परमं ययुः ॥ ४३

ततस्समाप्य विधिवत् ब्रह्मा यज्ञं मुनीश्वरात् ।
अभ्यर्च्य ऋत्विजश्चैव दक्षिणाभिर्द्विजांस्तदा ॥ ४४

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वैद्यनाथमनुज्ञाप्य तदा सन्तुष्टमानसः ।
सत्यलोकं जगामाशु हृदि ध्यात्वा सदाशिवम् ॥ ४५

अगस्त्यः —

वैद्यनाथस्थले तस्मात् गयाक्षेत्रसमं भुवि ।
तदारभ्य मुनिश्रेष्ठा गङ्गाकुण्डमिदं विदुः ॥ ४६

ब्रह्मकुण्डमिति ख्यातं ब्रह्महत्यादिपापहम् ।
दर्शनं ब्रह्मकुण्डस्य जलपानं च मुक्तिदम् ॥ ४७

त्रयस्त्रिंशत्कोटिगणैस्तीर्थैरासेवितोदके ।
ब्रह्मकुण्डे नरा स्नान्ति य तु भक्तिसमन्विताः ॥ ४८

तेषामष्टविधा सिद्धिः भवत्येव न संशयः ।
स्वर्णस्तेयी सुरापायी गुरुतल्पी च वीरहा ॥ ४९

भ्रूणहा वृषलीभुक्ता ब्रह्मकुण्डाभिषेचनात् ।
वैद्यनाथस्थले शुद्धो भवेत्तीर्थस्य वैभवात् ॥ ५०

ब्राह्मणः क्षत्रियो वापि वैश्यः शूद्रोऽन्य एव वा ।
वैद्यनाथस्थलं प्राप्य ब्रह्मकुण्डजले शुभे ॥ ५१

स्नात्वा नत्वा महादेवं पित्रोर्मृतदिनेऽपि वा ।
माघमासेऽथवा ऋक्षे माघाख्ये पितृदेवते ॥ ५२

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

यस्मिन् कस्मिंश्च दिवसे देवर्षिपितृतर्पणम् ।
किञ्च द्विजान् दक्षिणाभिस्तिलदानैर्यथाविधि ॥ ५३

यः करोति नरो भक्त्या तस्येदं फलमुच्यते ।
गयायां पिण्डदानेन प्रयागे पिण्डदानतः ॥ ५४

पिण्डदानेन रामेशे यथा मुक्तिस्तथा द्विजाः ।
ये शृण्वन्ति कथामेतां पुण्यामद्भुतवैभवाम् ।। ५५

पठन्ति वाखिलान् कामान् प्राप्नुयुर्मुनिपुङ्गवाः ॥ ५६

इति श्रीशैवपुराणे कोटिरुद्रसंहितायामुत्कृष्टशिवक्षेत्रप्रकरणे श्रीवैद्यनाथस्थानमाहात्म्ये कमलासनपूजा नाम सप्तमोऽध्यायः ।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

॥ अष्टमोऽध्यायः ॥

अगस्त्य उवाच –

श्री वैद्यनाथाय नमः ॥

शृणुध्वं संप्रवक्ष्यामि वैद्यनाथस्य वैभवम् ।
शृण्वतां पठतां पुंसां सौभाग्यदमनुत्तमम् ॥ १

पुरा राथंतरे कल्पे त्वचिकित्साचिकित्सकम् ।
अपूजयत् कुजो भक्त्या तदद्य प्रब्रवीमि वः ॥ २

पादे हिमवतः शम्भुरूर्ध्वरेताः फलाप्तये ।
तपश्चकार पार्वत्याः केलियोगेच्छुरग्रतः ॥ ३

न्यस्ताक्षिरर्के स्वात्मीये स्वाध्यात्मज्ञानकौशलः ।
एवं तपति गौरीशे स्वेतबिन्दुरभून्मुखात् ॥ ४

पपाताङ्गाररूपोऽसौ प्रलयाग्निरिवापरः ।
भूमेरधो रक्तवर्णो ज्वालामाला प्रभायुतः ॥ ५

उष्णेन तेजसा तस्य स्वेतबिन्दोश्चचाल भूः ।
अस्तुवत्पारमेशानं वाक्यैरुपनिषद्भवैः ॥ ६

भूत्या स्तोत्रेण सन्तुष्टः कृपां शम्भुश्चकार वै ।
भूमिं समब्रवीद्देवो देवि विश्वम्भरे तव ॥ ७

स्तोत्रेण तोषितोऽहं ते वरं वृणु ददाम्यहम् ।
इत्युक्ता तेन देवेन धरणी प्राह शङ्करम् ॥ ८

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

स्वामिन् शम्भो महादेव स्त्वेतबिन्दुर्दहत्यलम् ।
रक्ष मां रक्ष मां देव पाहि मां पाहि मां प्रभो ॥ ९

भुवानुनीतश्शम्भुस्तां उवाच धरणीं शिवम् ।
विश्वम्भरे त्वं माभैषीः आर्तिं ते शमयाम्यहम् ॥ १०

एवमुक्ते महेशे तु रक्तवर्णो मुनीश्वराः ।
रक्ताम्बरधरः क्षोण्याः जातः शम्भोरनुग्रहात् ॥ ११

अङ्गारकः कुमारोऽसौ शम्भोः पादं ननाम च ।
ततस्तुष्टो महादेवः कुमारमवदत्तदा ॥ १२

क्रूरकर्मन् कुमार त्वं भूम्यास्सुखकरो भव ।
भौम तुष्टोऽस्मि भद्रं ते भविष्यति न संशयः ॥ १३

इदानीं गच्छ कावेर्याश्चोत्तरे योजनावधि ।
अस्ति क्षेत्रं महापुण्यं पूर्वाबोधेस्तु पश्चिमे ॥ १४

वैद्यनाथमिति ख्यातं मम स्थानमनुत्तमम् ।
तत्र गन्तुं समुद्युक्तो गच्छ वारणसीमितः ॥ १५

ततः केदारसंस्थं मां स्तुत्वा नत्वा ततः परम् ।
कालहस्तीश्वरं शम्भुं स्तुत्वा नत्वा ततः परम् ॥ १६

वृद्धाचलाग्रसंस्थं मां स्तुत्वा नत्वा ततः परम् ।
भौम गच्छ महत् क्षेत्रं सर्वपातकनाशनम् ॥ १७

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

त्रिषु लोकेषु विख्यातं परं ब्रह्मपुराभिधम् ।
श्रीकालीनगराख्यं च प्रसिद्धिमिह भूतले ॥ १८

रहस्यकाशीत्यत्यंतशोभनं शुभदायकम् ।
तस्मिन् कालीतिल्लवनात् चित्सभेशाज्ञयागता ॥ १९

श्रीकालिनगरे कार्यसिद्धिं प्राप्य ततश्चर ।
तस्मिन् क्षेत्रे महापुण्ये त्रयस्त्रिंशच्च कोटयः ॥ २०

सुराश्च मुनयो रूद्राः सर्वे द्वादशभास्कराः ।
सर्वाश्शक्तिगणास्सर्वे गणनाथाश्चतुर्दश ॥ २१

पुण्यतीर्थानि सर्वाणि पुष्करादीनि भूमिगा ।
गङ्गाद्याः सरितस्सर्वाः श्रीकालीनगरे सदा ॥ २२

मामुपास्यैव तिष्ठन्ति महादेव मुमापतिम् ।
नौरूपे स्फाटिके रत्ने नवरत्नालये कुज ॥ २३

सहस्रमानहेमाभैरक्षैरत्यन्तराजिते ।
समुद्रैरावृतस्तत्र चतुर्भिः प्रलये पुरा ॥ २४

महादेव्या समाश्लिष्टस्सततं विहराम्यहम् ।
अष्टानां भैरवाणां च मूलभूतश्चिदात्मकः ॥ २५

अनन्तानन्दशक्तिश्च सदा मन्मूर्तिरुज्वलः ।
आपदुद्धारको भाति सर्वलोक वरप्रदः ॥ २६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

आपदुद्धारकाः तस्मात् उदभून्मन्त्रशक्तयः ।
तस्मिन् क्षेत्रे महापुण्ये मन्त्रसिद्धिर्भवत्यलम् ॥ २७

तत्सेवया समस्तानां जन्तूनामचिरात् भुवि ।
अणिमाद्यष्टसिद्धिश्च भवत्येव न संशयः ॥ २८

श्वेतारण्यं महाक्षेत्रं श्रीकालीपुरमुत्तमम् ।
चिदम्बरं विदुर्लोके त्रिस्थानमिह विश्रुतम् ॥ २९

षट्षष्टिकोटितीर्थानि तत्रैव निवसन्ति च ।
दशानां ब्रह्मणां तत्र पूजयानन्दभागहम् ॥ ३०

षड्भिश्च ऋतुभिस्तत्र पूजितोऽस्मि यथाविधि ।
श्रीकालिनगरे तत्र शरजन्माख्यया सरः ॥ ३१

हेमपद्मयुतं भाति सर्वाभीष्टप्रदायकम् ।
ब्रह्मतीर्थमिति ख्यातं हेमपङ्कजभासुरम् ॥ ३२

तीर्थानामद्भुतं तीर्थं भासते तत्र भूमिज ।
तत्र स्नात्वा यथा वत्स उमापतिमनुत्तमम् ॥ ३३

आपदुद्धारकं देवं देवीं च स्थिरसुन्दरीम् ।
किञ्च ब्रह्मपुरीशानं रत्ननौकास्पदं शिवम् ॥ ३४

भद्रकालीं च संपूज्य ततो वेदपुरीं व्रज ।
श्रीकालिनगरस्यास्य नैरृते घटिकाद्वये ॥ ३५

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वैद्यनाथस्थलं दिव्यं अस्ति क्षेत्रं महत्तरम् ।
सर्वाभीष्टप्रदं दिव्यं कलिकल्मषनाशनम् ॥ ३६

तत्र गत्वा महीपुत्र नित्यानन्दकरं शुभम् ।
तत्रैव भासते तीर्थं गोक्षीरमिति विश्रुतम् ॥ ३७

यत्र स्नात्वा नरा यान्ति अचिरात् परमं गतिम् ।
तत्र स्नात्वा च पीत्वा च मां पूजय यथाविधि ॥ ३८

अहं प्रत्यक्षभूतस्सन् वरं दास्ये झटित्यहम् ।
इत्याज्ञप्तस्तदा भौमः शङ्करेण महात्मना ॥ ३९

प्रणम्य शतशस्तुत्वा वाक्यैरुपनिषद्भवैः ।
तदा मन्दं विनिर्गत्य शङ्करोक्तं यथात्मनः ॥ ४०

काश्यादीनि च सर्वाणि क्षेत्राण्यप्युत्तमानि च ।
संसेव्य नियमेनैव शङ्करोक्तिं स्मरन् सदा ॥ ४१

पुण्टरीकपुरं प्राप्य ततो ब्रह्मपुरीश्वरम् ।
प्राप्य नत्वा पुनस्तुत्वा ततो वेदपुरीं गतः ॥ ४२

ततस्तीर्थं महापुण्यं नाम्ना गोक्षीरसंज्ञकम् ।
संप्राप्य नियमेनैव तत्र स्नात्वा यथाविधि ॥ ४३

धृत्वा दूकूलममलं शुद्धयज्ञोपवीतवान् ।
भस्मोद्धूलितसर्वाङ्गस्त्रिपुण्ड्राङ्कितमस्तकः ॥ ४४

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अद्राक्षीन्मनसा साम्बं रुद्राक्षकृतभूषणः ।
समाप्य निखिलं कर्म तत्रत्यानृषिसत्तमान् ॥ ४५

तोषयित्वा गवाद्यैश्च ततो गच्छन् गणाधिपम् ।
पूजयित्वा यथाशास्त्रं गजाननमुमासुतम् ॥ ४६

स्वामिन् कल्पकविघ्नेश कल्पयाशु शुभं मम ।
इति सम्प्रार्थ्य विघ्नेशं नत्वावरणादेवतान् ॥ ४७

ततो बालाम्बिकानाथं पूजयामास भूमिजः ।
अर्घ्यपाद्यादिकान् दत्वा यथाविधि यथाक्रमम् ॥ ४८

पञ्चामृतैः पञ्चगव्यैः कदल्या त्रिफलैरपि ।
लिकुचैः पनसैश्चैव पक्वैर्नारङ्गराशिभिः ॥ ४९

दधिक्षौद्रघृतक्षीरैरिक्षुसारैर्मनोहरैः ।
नालीकेरोदकैः शुद्धैस्तैलैर्गोधूमचूर्णकैः ॥ ५०

बिल्वोदकैर्गन्धसारैरमृतैरिन्दुसम्भवैः ।
शतरुद्रीयमन्त्रज्ञैर्ब्राह्मणैर्वेदपरागैः ॥ ५१

ऋषिभिस्समभिश्चान्यैरसंख्याकैर्मुनीश्वरैः ।
ब्रह्मज्ञैर्ब्रह्मनिष्ठैश्च सार्धं अङ्गारको महान् ॥ ५२

अभिषिच्य महादेवं शङ्खाद्भिर्मन्त्रपूर्वकम् ।
ततो रक्ताम्बरर्यज्ञस्सूत्रस्सौवर्णकैरपि ॥ ५३

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

रक्तपुष्पैस्समभ्यर्च्य रक्तगन्धानुलेपनैः ।
अलङ्कृत्य महेशानं पद्मरागैर्विशेषतः ॥ ५४

कल्हारकुसुमैः किञ्च रक्तोत्पलगणैरपि ।
मुक्ताहारैर्महार्हैश्च भूषणैर्मकुटादिभिः ॥ ५५

आराधयन्मुदा भक्त्या अन्यैग्रहगणैस्सह ।
धूपैः कर्पूरदीपैश्च तोषयित्वा महेश्वरम् ॥ ५६

नैवेद्यं षड्रसोपेतं सर्षपान्नं सतैलकम् ।
आढकानां तिलानां च मुद्गानां सगुलान्नकम् ॥ ५७

दध्यन्नं पायसं चैव फलत्रयसमन्वितम् ।
शृङ्गिबेरेण संयुक्तं सर्वपात्रशलाटुकम् ॥ ५८

उपदंशशतैर्युक्तं अत्यद्भुतरसैर्युतम् ।
कारवल्लीफलं किञ्च वृन्ताकं च सवृन्तकम् ॥ ५९

एवं शाकशतश्चापि दिव्यगन्धसमन्वितैः ।
सद्यो घृतैर्गुलक्षीरैस्समण्डदधिमण्डलैः ॥ ६०

इक्षुसारैर्महासारैस्तथा मारीचसारकैः ।
माषापूपैर्गुलापूपैर्घृतभक्ष्यैर्मनोहरैः ॥ ६१

मधुगर्भैः शष्कुलीनां राशिभिर्वटकैस्तथा ।
सद्यश्चन्द्रसमुद्भूतैः अमृतैर्मधुरैरपि ॥ ६२

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

रसायनैश्च कापित्थैः औवरुकफलानुगैः ।
पानकैर्मधुभिश्चैव सेचकैरुदकैस्तदा ॥ ६३

हेमपत्रस्थितैः किञ्च मणिपात्रस्थितैरपि ।
एवं रजतपात्रस्थैः अन्यैश्च रसवस्तुभिः ॥ ६४

आराधयित्वा देवेशममृतांशुकलाधरम् ।
आद्यन्तरहितं शम्भुमचिकित्साचिकित्सकम् ॥ ३५

कर्पूरशकलामृष्टदिव्यताम्बूलपूर्वकम् ।
नीराजनैर्मङ्गलैश्च दीपपङ्क्तिसहस्रकैः ॥ ६६

कर्पूरसम्भवैः किञ्च छत्रैश्चामरपङ्क्तिभिः ।
माणिक्यदर्पणैश्चैव तालवृन्तसहस्रकैः ॥ ६७

व्यजनैर्मणिक्लृप्तैश्च किञ्च चामरसम्भवैः ।
मन्त्रपुष्पैश्चतुर्वेदमन्त्रपूतैर्विशेषतः ॥ ६८

स्वर्णपुष्पसहस्रैश्च तथा माणिक्यपुष्पकैः ।
बिल्वपत्रार्चनाजालैश्शिवनामसहस्रकैः ॥ ६९

दिव्यनृत्तैर्दिव्यगीतैः दिव्यवाद्यैर्विशेषतः ।
तोषयित्वा महादेवं अम्बिकारमणं प्रभुम् ॥ ७०

प्रदक्षिणसहस्रैश्च नमस्कारशतैरपि ।
अङ्गप्रदक्षिणैश्चैव तथा पदभवैरपि ॥ ७१

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

आनन्ददन्विरूपाक्षमानन्दभरनिर्भरम् ।
आदिदेवं महादेवं बालाम्बासहितं शिवम् ॥ ७२

अस्तुवद्वेदवेदान्तवचोगुम्भैः सहस्रशः ।
अथास्यात्यन्तभक्त्या च पूजया चार्चनाविधैः ॥ ७३

सन्तुष्टो भिषगीशानः करुणावरुणालयः ।
कृष्णाङ्गारचतुर्दश्यां नन्दिकेशपुरस्सरैः ॥ ७४

अनन्तैश्च गणैः किञ्च गणेशेन गुहेन च ।
बालाम्बया महादेव्या सर्वैर्देवैश्च वन्दितः ॥ ७५

वैद्यनाथः स्वयं लिङ्गाद्दिव्यतेजोमयादपि ।
प्रादुर्भूत दयाम्भोधिर्वृषारूढो महेश्वरः ॥ ७६

ततः कुजो महातेजाः सानन्दाम्बुमुखाम्बुजः ।
ततो बालाम्बिकावामभागं सर्वेश्वरं प्रभुम् ॥ ७७

अद्राक्षीदद्भुताकारं रुद्राक्षकृतभूषणम् ।
नीलजीमूतसङ्काशकण्ठकान्तिविभूषितम् ॥ ७८

ललाटनयनज्वालाशलभीकृतमन्मथम् ।
फणीन्द्रभोगसम्बद्धजटामकुटमण्डितम् ॥ ७९

गण्डमण्डलपर्यन्तक्रीडन्मकरकुण्डलम् ।
भवदावानलज्वालापरितप्तजनादरम् ॥ ८०

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

गङ्गातुङ्गतरङ्गालिविलसन्मौलिमण्डलम् ।
सुधांशुरेखासम्बद्धचूडामणिसमन्वितम् ॥ ८१

व्याघ्रचर्मपरीधानं बिल्वमालाभिशोभितम् ।
हारायितशरत्कालतारागणसुशोभितम् ॥ ८२

नयनामृतपाथोथिसेतुबन्धसुनासिकम् ।
गङ्गात्रिपथगालीलापुण्ड्रेखाविराजितम् ॥ ८३

कोटिकन्दर्पसङ्काशं करुणामयविग्रहम् ।
कार्मुकीभूतकल्याणगिरीन्द्रकरपङ्कजम् ॥ ८४

बाणायितजगन्नाथं नारायणकराम्बुजम् ।
दयामृततरङ्गालिकरम्बितविलोचनम् ॥ ८५

कराग्रविलसद्रम्यमृगबालकशोभितम् ।
कराग्निकल्पितानल्पभक्तरक्षाग्निसाक्षिकम् ॥ ८६

प्रपञ्चभयसन्दानपरीक्षितकराम्बुजम् ।
पदानतजनानल्पवरदानविचक्षणम् ॥ ८७

वाचामगोचरीभूतमहिमानामुमापतिम् ।
पुङ्गवत्तुङ्गवपुषामधिरूढं सहोमया ॥ ८८

दृष्ट्वाऽऽनन्दमहाम्भोधिनिमग्नहृदयस्तदा ।
पपात दण्डवद्भूमौ भक्त्या परमया युतः ॥ ८९

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

गद्गदेन च कण्ठेन किञ्चिद्वक्तुमपारयन् ।
करुणाविग्रहेनाथनाथेन जगतां तदा ॥ १०

किञ्चित्स्मितं कटाक्षेण वीक्षितस्स विचक्षणः ।
वक्तुं स्तोतुमसौ किञ्च सचेतनहृदम्बुचः ॥ ११

उच्चैः कृताञ्जलिपुटस्तोतुमुद्युक्तमानसः ।
तुष्टाव परितुष्टात्मा स्पष्टरोमाञ्चकञ्चुकः ॥ १२

रक्ष रक्ष महादेव दीनरक्षैकदीक्षित ।
त्राहि मां त्राहि मां शम्भो स्वामिन् त्वत्पदसेविनम् ॥ १३

आद्यन्तरहितेशान वेदवेद्य जगत्पते ।
अनादिर्वैद्य सर्वज्ञ वैद्यनाथ नमोऽस्तु ते ॥ १४

गङ्गाधर महादेव चन्द्रवह्न्यर्कलाचन ।
पिनाकपाणे विश्वेश वैद्यनाथ नमोऽस्तु ते ॥ १५

वृषवाहन देवेश अचिकित्स्या चिकित्सकः ।
करुणाकर गौरीश वैद्यनाथ नमोऽस्तु ते ॥ १६

विधिविष्णुमुखैर्देवैरर्च्यमानपदाम्बुजः ।
अप्रमेय हरेशान वैद्यनाथ नमोऽस्तु ते ॥ १७

रामलक्ष्मणसूर्येन्दुजटायुःश्रुतिपूजित ।
मदनान्तक सर्वेशं वैद्यनाथ नमोऽस्तु ते ॥ १८

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

प्रपञ्चभिषगीशान नीलकण्ठ महेश्वर ।
विश्वनाथ महादेव वैद्यनाथ नमोऽस्तु ते ॥ ९९

उमापते लोकनाथ मणिमन्त्रौषधेश्वर ।
दीनबन्धो दयासिन्धो वैद्यनाथ नमोऽस्तु ते ॥ १००

त्रिगुणातीत चिद्रूप तापत्रय विमोचन ।
विरूपाक्ष जगन्नाथ वैद्यनाथ नमोऽस्तु ते ॥ १०१

भूतप्रेतपिशाचादेरुच्चाटनविचक्षण ।
कुष्ठादिसर्वरोगाणां संहर्त्रे ते नमो नमः ॥ १०२

जात्यन्धपङ्गुरोगादेः दिव्यरूपप्रदायिने ।
अनेकमूकजन्तूनां दिव्यवाक्प्रदायिने नमः ॥ १०३

इति स्तुतो वैद्यनाथो महादेवो दयानिधिः ।
प्राह गम्भीरया वाचा मन्दस्मितमुखाम्बुजः ॥ १०४

भौम हे वत्स दास्यामि वरं वृणु यथेप्सितम् ।
इति तत्सूक्तिपीयूषधाराभिरभिषेचितः ॥ १०५

भौमोऽपि स कृतार्थोऽस्मि कृतार्थोस्मीति चाब्रवीत् ।
वैद्यनाथ महादेव तव पदाम्बुजद्वये ॥ १०६

यथा मया त्वं लिङ्गेस्मिन् पूजितः परमेश्वर ।
तल्लेशलेशतो वापि भवन्तं पूजयन्ति ये ॥ १०७

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

तेऽभीष्टसिद्धिं संप्राप्य प्राप्नुवन्तु भवत्पदम् ।
मम वारे विशेषेण स्नात्वा सिद्धामृतोदके ॥ १०८

ब्राह्मणान् तोषयेद्भक्त्या शाल्यन्नैः षड्रसैर्युतैः ।
ताम्बूलैर्दक्षिणाभिश्च यस्तु भक्तिसमन्वितः ॥ १०९

तस्य रोगा विनश्यन्तु सर्वेकामाः फलन्तु च ।
आयुरारोग्यमैश्वर्यं सम्भवेत्त्वत्प्रसादतः ॥ ११०

किञ्चाऽत्र भक्ति संयुक्ता मासेषु द्वादशेष्वपि ।
पुष्यमासे माघमासे फाल्गुने च विशेषतः ॥ १११

मम वारे महेशान स्नात्वा सिद्धामृतोदके ।
माहात्म्यं तावकं शम्भो श्रुत्वा भक्ति समन्वितः ॥ ११२

अभिषिच्य यथाशक्ति भवन्तं मन्त्रपूर्वकम् ।
तत्रत्यैर्ब्राह्मणैस्साकं शतरुद्रीयजापकैः ॥ ११३

पूजयित्वा यथाशास्त्रं सन्तर्प्य ब्राह्मणान् ततः ।
द्रव्यमन्नं फलं वृत्तं रक्तवस्त्रं च कम्बलम् ॥ ११४

दशदानानि यः कुर्यात् तस्याभीष्टप्रदो भव ।
तत्सर्वमक्षयं शम्भो त्वत्प्रसादाद्भवेदलम् ॥ ११५

इति संप्रार्थितो देवः कुजेन करुणानिधिः ।
अन्वग्रहीन्महादेवो भूपुत्राय महात्मने ॥ ११६

 Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

यद्यदत्र महाभाग भवता याचितोस्म्यहम् ।
तत्तत्सर्वं तथा भूयात् इत्युक्तो स दयानिधिः ॥ ११७

अद्यापि बालिकायुक्तः तस्मिन् क्षेत्रे गणैर्युतः ।
सर्वलोकैः पूज्यमानो विभाति मुनिपुङ्गवाः ॥ ११८

अङ्गारकः तथैवास्ते पूजयित्वा महेश्वरम् ।
तस्मादङ्गारवारं तु प्रसिद्धमिह भूतले ॥ ११९

इति श्रीशैवपुराणे कोटिरुद्रसंहितायां उत्कृष्टशिवक्षेत्रप्रकरणे श्रीवैद्यनाथस्थानमाहात्म्ये अङ्गारकपूजा नाम अष्टमोऽध्यायः ॥

॥ नवमोऽध्यायः ॥

अगस्त्य उवाच —

भूयो वक्ष्यामि माहात्म्यं वैद्यनाथस्य शूलिनः ।
शृण्वतां पठतां पुंसां भवेयुः संपदोऽखिलाः ॥ १

सम्पातिश्च जटायुश्च परस्परजिगीषया ।
उच्चेलतुर्नभोमार्गे त्वहंपूर्विकया पुनः ॥ २

तावुभौ मण्डलं भानोर्गत्वा तस्यांशुमण्डलैः ।
प्लुष्टपक्षौ विसंज्ञौ च पेततुर्धरणीतले ॥ ३

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

संपातिस्तु तयोर्मध्ये विन्ध्यपर्वतमाप्तवान् ।
जटायुर्वैद्यनाथाख्ये पुण्यक्षेत्रेऽतिभासुरे ॥ ४

मणिमन्त्रौषधाख्ये तु कुण्डे सर्वार्थसिद्धिदे ।
पतन् तस्य च माहात्म्यवैभवाद्विहगाधिपः ॥ ५

सपक्षस्सबलो भूत्वा लब्धसंज्ञः क्रमेण सः ।
चक्षुरुन्मील्य तेजस्वी दृष्ट्वा लिङ्गं तदद्भुतम् ॥ ६

स्नात्वा गोक्षीरतीर्थेऽस्मिन् अचिकित्साचिकित्सकम् ।
भिषगीशं समाराध्य पूर्णपक्षोऽभवद्द्विजाः ॥ ७

तस्मिन् काले रावणोऽसौ सीतामपहरच्छुभाम् ।
सीतापहारिणं क्रूरं प्राप्तं वैद्येश्वरस्थलम् ॥ ८

राक्षसेन्द्रं जटायुस्तं दृष्ट्वा स्यन्दनगामिनम् ।
श्रुत्वा च रक्ष रक्षेति वाचं कस्याश्चिदद्भुताम् ॥ ९

तत्रैव स्यन्दने सीतां प्रलपन्तीमनाथवत् ।
दृष्ट्वा युद्धाय सन्नद्धः सम्बभूव विहङ्गमः ॥ १०

ततो युद्ध्वा महावीर्यः पौलस्त्येन दुरात्मना ।
जटायुः च्छिन्नपक्षस्सन् प्राणमुक्तस्तदा स्थितः ॥ ११

जित्वा गृध्रं रावणोऽपि सीतामादायमैथिलीम् ।
रामेति लक्ष्मणेत्येवं प्रलपन्तीं पतिव्रतम् ॥ १२

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अशोकवनिकामध्ये स्थापयामास राक्षसः ।
मारीचं राघवो हत्वा प्राप वैद्येश्वरस्थलम् ॥ १३

स लक्ष्मणाय रामाय जटायुर्मुनिपुङ्गवाः ।
सीतावृत्तान्तमावेद्य गृध्रः प्राणान् तदाजहौ ॥ १४

रामश्च लक्ष्मणश्चोभौ दग्ध्वा गृध्रं जटायुषम् ।
स्नात्वा सिद्धामृते भक्त्या संपूज्य भिषगीश्वरम् ॥ १५

प्रापयित्वा पदं शैवं जटायुषमरिन्दमम् ।
आज्ञया भिषगीशस्य जित्वा रावणमाहवे ॥ १६

प्राप्य सीतामयोध्यां च गत्वा राज्येऽभिषेचितः ।
पालयित्वाऽखिलां पृथ्वीं अन्यैश्च भ्रातृभिस्सह ॥ १७

त्रिसहस्रं हायनानां राज्यं कृत्वा ततः परम् ।
सह सौमित्रिणा रामः पुनरायान्महाबलः ॥ १८

वैद्यनाथस्थलं रम्यं प्राप्य मन्त्रामतीर्थके ।
स्नात्वा रम्ये ब्रह्मकुण्डे स्नात्वा कृत्वाऽखिलाः क्रियाः ॥ १९

पश्चाद्रामो धनुष्कोटिं नैरृत्यां दिशि संस्थिताम् ।
गत्वा सन्नियमैर्युक्तः सर्वपापप्रणाशिनीम् ॥ २०

तत्र गङ्गां समावाह्य स्नात्वा भक्तियुतस्तथा ।
ततो देवालयं प्राप्य स्नात्वा सिद्धामृतोदके ॥ २१

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नित्यकर्म समाप्याथ तत्रत्यान् द्विजसत्तमान् ।
दक्षिणाभिः तोषयित्वा श्रुत्वा तत्स्थलवैभवम् ॥ २२

कल्पकाख्यं गणपतिं गुहं बालाम्बिकामपि ।
भिषगीशं च सम्पूज्य चतुःषष्ट्युपचारकैः ॥ २३

सौगन्धिकैर्बिल्वपत्रैः नानाविधसुमैरपि ।
अभ्यर्च्य स्तोत्रबृन्देन वैद्यनाथमतोषयत् ॥ २४

ततो मुदान्वितो रामो वैद्यनाथस्य भक्तितः ।
उत्सवं कारयामास माघमासे समाहितः ॥ २५

नवध्वजसमायुक्तं नवकुण्डसमन्वितम् ।
कल्पयित्वा ध्वजारोहं महोत्सवमचालयत् ॥ २६

हेमध्वजैः पताकाभिः रम्भाभिर्वीथिकाः शुभाः ।
पूर्णकुम्भैरलङ्कृत्य दीपालीभिर्मनोहरैः ॥ २७

शङ्खभेरीमृदङ्गैश्च काहलाद्यैर्महेशितुः ।
सन्तोषं कारयामास वीणागानैश्च शोभनैः ॥ २८

दिव्याङ्गनानृत्तगीतैः भिषगीशमुपाचरत् ।
ईशाननायकं देवं दिव्याङ्गनविलोचनम् ॥ २९

वृषादिवाहने स्थाप्य दिव्यवस्त्रैरलङ्कृतम् ।
रत्नमाणिक्यवैडूर्यदामभिस्समलङ्कृतम् ॥ ३०

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वीथिकासु च रम्यासु चालयित्वा महेश्वरम् ।
नीराजनविधिं कृत्वा गोपुरद्वारसीम्न्यलम् ॥ ३१

ईशाननाथं संस्थाप्य मणिमण्डपिकान्तरे ।
आज्यक्षीरयुतैरन्नैरपूपैर्घृतपाचितैः ॥ ३२

पनसानां फलैस्सूपैः इक्षुखण्डैर्महेश्वरम् ।
तोषयित्वा वैद्यनाथं रथोत्सवमकारयत् ॥ ३३

अमायां माघमासान्ते कावेर्याः तीर्थवैभवम् ।
अस्तुवद्वैद्यनाथं च सिद्धिदं बेरविग्रहम् ॥ ३४

कृष्णश्रीकण्ठकण्ठीश नमो गौरीपते शिव ।
नृत्तसुन्दर शम्भो ते नमस्ते भक्तवत्सल ॥ ३५

नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं दयानिधे ।
इति स्तुतो वैद्यनाथो राममाहेति शङ्करः ॥ ३६

राम ! अनेनोत्सवेनाहं तोषितोऽस्मि सहस्रशः ।
वरं वृणु ददाम्यद्य सन्तुष्टो रघुनन्दन ॥ ३७

भिषगीशेनैवमुक्तो वरं वव्रे रघूद्वहः ।
वैद्यनाथ त्वयि मम भक्तिरस्त्वचला सदा ॥ ३८

मयाऽऽराधित एतस्मिन् नवलिङ्गे महेश्वर ।
भक्त्याभिषेचनं यस्तु तस्य कामान् प्रपूरय ॥ ३९

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ईशाननायकं देवीं दिव्याञ्जन विलोचनाम् ।
यः प्रीणयत्युत्सवेन तस्य शत्रून् विनाशय ॥ ४०

ददस्व राज्यलक्ष्मीं च दीर्घमायुर्यशो बलम् ।
इत्येवं प्रार्थितः शम्भुः वैद्यनाथोऽवदद्विभुः ॥ ४१

राम त्वया प्रार्थितं यत् तदस्तु मदनुग्रहात् ।
मदुत्सवे माघमासे स्नात्वा सिद्धामृते च माम् ॥ ४२

ये दर्शयन्ति भक्त्या वै पुत्रदारादिभिस्सह ।
कामान् भुञ्जन्तु देहान्ते मत्सायुज्यं लभन्तु ते ॥ ४३

इति दत्वा वरं शम्भुः रामस्य भिषगीश्वरः ।
अद्यापि भाति सर्वेषां सर्वाभीष्टप्रदायकः ॥ ४४

भिषगीशाद्वरं प्राप्य रामोऽपि तदनुज्ञया ।
गृध्रऋक्स्कन्दनगरादयोध्यां प्राप राघवः ॥ ४५

अपालयज्जगत्सर्वं वसिष्ठानुमते स्थितः ।
नारायणोऽपि संपूज्य वैद्यनाथं महेश्वरम् ॥ ४६

सामर्थ्यं लोकरक्षायां प्राप्तवानत्र हे द्विजाः ।
चन्द्रः शम्भुं समाराध्य वैद्यनाथं महेश्वरम् ॥ ४७

ताराणामधिपो भूत्वा विभाति मुनिपुङ्गवाः ।
दक्षप्रजापतेरासीत् कन्या कमललोचना ॥ ४८

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अदितिर्नाम तां वेधा उपयेमे विधानतः ।
काश्यपस्स मुदा रेमे आदित्या सह भार्यया ॥ ४९

तस्यां समभवत् सूर्यः सर्वदेवमयः पुरा ।
त्वष्टा तस्मै उषां कन्यां अर्यम्णे प्रददौ सुताम् ॥ ५०

रराम उषया प्रीतो जायया सवितोन्मदः ।
सूर्यस्य तेजसा त्वष्टुः प्लुष्टदेहा सुता तदा ॥ ५१

त्वष्टे निवेदयामास तद्वृत्तान्तं यथातथम् ।
त्वष्टा वाक्यं कन्यकायां रुग्णा या श्रुतवान्नुषा ॥ ५२

सहस्रकिरणं शाणे समारोप्य महाप्रभम् ।
उल्लिलेख भृशं त्वष्टा त्वष्टुरूल्लेखनाद्रविः ॥ ५४

तान्तो रुग्णो नष्टचेताः प्राप्य वैद्येश्वरस्थलम् ।
वैद्यनाथं समराध्य रोगान्मुक्तो महाद्युतिः ॥ ५४

किञ्चाश्विजे माघमासे दिनत्रयसपर्यया ।
वर्षपूजासमुद्भूतफलं लेभे महेश्वरात् ॥ ५५

मदाबलो महावीर्यो लोकान् सर्वान् प्रभासयत् ।
तदारभ्य स्थलमिदं विदुस्सूर्यपुरं बुधाः ॥ ५६

अगस्त्यः —

सोमको नाम वेदाश्च हृत्वा पातालमभ्यगात् ।
देवाश्शिवं महादेवं ध्यायन्तस्तुष्टुवुस्सदा ॥ ५७

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

शिवस्याज्ञां पुरस्कृत्य विष्णुर्मत्स्याकृतिः खलम् ।
हत्वोद्धृत्य यथापूर्वं स्थापयामास ताः श्रुतिः ॥ ५८

वेदा वैद्येश्वरस्थानं प्राप्य सम्पूज्य शूलिनम् ।
यथोक्तेन विधानेन वाक्यैरुपनिषद्भवैः ॥ ५९

अस्तुवन्वैद्यनाथं तं स्तोत्रैः सन्तुष्टमानसः ।
प्रादुर्भूतो महेशानः चन्द्रार्धकृतशेखरः ॥ ६०

वरं वृणुत भद्रं वो भविष्यति न संशयः ।
इत्युक्तो वैद्यनाथेन वरं वव्रुर्महेश्वरम् ॥

वेदाः —

वैद्यनाथ महादेव त्वयि भक्तिमचञ्चलाम् ।
अस्माकं देहि किञ्चास्ति विवक्षा परमेश्वर ॥ ६२

एतस्य स्थलवर्यस्य मदीयं नामकं कुरु ।
इति तेषां वचः श्रुत्वा प्रत्युवाच महेश्वरः ॥ ६३

युष्माभिः प्रार्थितं यद्यत्तत्तथैव न संशयः ।
इति तेषां वरं शंभुः दत्वा तु भिषगीश्वरः ॥ ६४

सह बालिकया देव्या विभाति मुनिपुङ्गवाः ।
बाहुलेयस्तु सम्पूज्य भिषगीशं पुरा द्विजाः ॥ ६५

तदाज्ञया महावीर्यं महाबलपराक्रमम् ।
तारकं रणभूमौ तं जित्वा सेनापतिर्बभौ ॥ ६६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

तदारभ्य स्थलमिदं विदुस्कन्दपुरं बुधाः ।
सुन्दरश्चोलदेशस्थः संपूज्य भिषगीश्वरम् ॥ ६७

रोगान्मुक्तश्च पापघ्ने वैद्यनाथस्थले द्विजाः ।
एका गौर्भिषगीशानं स्वकीयपयसा शिवम् ॥ ६८

संपूज्य कामधुक् जाता तन्निर्माल्यमयं शुभम् ।
तदारभ्य कृतं तीर्थं गोक्षीरमिति विश्रुतम् ॥ ६९

इक्षुसारमयं तीर्थं अभूद्भक्तस्य कस्यचित् ।
शिवप्रसादात्तद्दृष्ट्वा स भक्तो विस्मयं गतः ॥ ७०

हिरण्यवर्मणे राज्ञे स गत्वा तन्न्यवेदयत् ।
इक्षुसारमयं तीर्थमभूदद्य महाप्रभो ॥ ७१

श्रुत्वा हिरण्यवर्माऽथ तत्परीक्षार्थमागतः ।
सोऽवतार्यं सरस्यस्मिन् परीक्षां कृतवान् तथा ॥ ७२

ततः परीक्षाकाले तु तदिक्षुरसतां गतम् ।
अतस्तदिक्षुसारं तत्तीर्थं सर्वत्र विश्रुतम् ॥ ७३

जटायुषा चिरं स्नातं तन्नाम्ना पप्रथे भुवि ।
जटायुतीर्थमित्येतत् पवित्रं पापनाशनम् ॥ ७४

तदारभ्य स्थलमिदं गृध्रेशनगराभिधम् ।
स्वर्गादमृतमानीय सिद्धास्समुनयः पुरा ॥ ७५

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

विनिवेद्य महाभागो वैद्यनाथाय शम्भवे ।
इदानीं पूजयन्ती स्म कालप्रच्छन्नरूपिणः ॥ ७६

तीर्थेऽस्मिन् प्रक्षिपद्देवोऽप्यमृतं प्रीतिमान् तदा ।
तस्मात्सिद्धामृतमिति तीर्थं तद्भुवि विश्रुतम् ॥ ७७

तस्मिन्नर्जुननामा च कश्चिद्भक्तो महामतिः ।
दत्वा सुतां तु देवाय वैद्यनाथाय शम्भवे ॥ ७८

अनन्यसुलभां काञ्चित् प्राप्तवान् गतिमद्भुताम् ।
वैद्यनाथं शतानन्दस्सम्पूज्य वरमाप सः ॥ ७९

शतानन्दमुनेश्शापात् दर्दुराः श्यामरूपिणः ।
तस्मिन् सिद्धामृतेऽद्यापि न दृश्यन्ते मुनीश्वराः ॥ ८०

ताभ्यां च भेकतीर्थं तत् प्रसिद्धमिह भूतले ।
नारदश्च भरद्वाजस्सुसंपूज्य महेश्वरम् ॥ ८१

वैद्यनाथस्थले स्नातां सर्वज्ञा मुनिपुङ्गवाः ।
किन्नरा धरणीपाला विद्याधरमहर्षयः ॥ ८२

वैद्यनाथं समाराध्य सर्वान् कामान् प्रपेदिरे ।
वैद्यनाथस्थले देवाः कोदण्डतटिनीजले ॥ ८३

स्नात्वाऽमरत्वं संप्राप्तां सत्यं सत्यं मुनीश्वराः ।
कोदण्डतटिनी लोके रामतीर्थमिति श्रुतम् ॥ ८४

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वैद्यनाथस्थले पुण्ये श्रीरामतटिनीजले ।
पूष्णि मेषं गते सोमवारयुक्तपुनर्वसौ ।। ८५

सर्वपापहरे रम्ये श्रीरामनवमीदिने ।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ।। ८६

तीर्थानि कुर्वते वासं तत्र वै स्नानमात्रतः ।
सप्तजन्मार्जितं घोरं पातकादि विनश्यति ।। ८७

यः इदं शृणुयान्नित्यं पठेद्वा सुसमाहितः ।
भवरोग विनिर्मुक्तस्स याति परमं पदम् ।। ८८

इति श्रीशैवपुराणे कोटिरुद्रसंहितायामुत्कृष्टशिवक्षेत्रप्रकरणे श्रीवैद्यनाथस्थलमाहात्म्ये अखिलदेवपूजनं नाम नवमोऽध्यायः ।।

।। दशमोऽध्यायः ।।

अगस्त्यः —

शृणुध्वं मुनयस्सर्वे भिषगीशस्य वैभवम् ।
यस्य श्रवणमात्रेण नरः पापात् प्रमुच्यते ।। १

सिद्धाः पुरा द्वापरान्ते गन्धर्वैरमरैस्सह ।
किन्नरैरेत्य हेमाद्रिमस्तुवन् परमेश्वरम् ।। २

ततः प्रसन्नो भगवान् सिद्धानामभवन् पुरः ।
ततस्तानब्रवीच्छम्भुः कृपया परमेश्वरः ।। ३

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सिद्धाः ! किमिह संप्राप्ताः कुशलं नास्ति वोऽधुना ।
लक्ष्यन्ते खिन्नवदनाः यूयं वदत चापदम् ॥ ४

इत्युक्तास्ते महेशेन सिद्धाः शम्भुं समब्रुवन् ।

सिद्धाः –

देवदेव महादेव परमेश्वर ते नमः ॥ ५

आसन्नः कलिरस्माकं भीतिस्सञ्जायतेऽधुना ।
चतुर्गुणाः कृते धर्माः त्रेतायां त्रिगुणाश्शिव ॥ ६

द्वापरे द्विगुणाः प्रोक्ताः कलावेकगुणस्मृतः ।
कलौ प्राप्तेः द्विजास्सर्वे नित्यकर्माण्ड्वरानपि ॥ ७

नादरिष्यन्ति भूपालैर्भविष्यन्ति च बाधिताः ।
ब्राह्मणाश्च महात्मानो लोके धर्मपराङ्मुखाः ॥ ८

कृते मेरुसमं स्वर्णं ददतां श्रोत्रियाय यत् ।
नराणां फलमुक्तं हि त्रेतायां तु तदर्धकम् ॥ ९

तदर्धं द्वापरे प्रोक्तमिति नो निश्चिता मतिः ।
कलौ सर्षपमात्रं यत् स्वर्णं विप्राय दीयते ॥ १०

तदेव मेरुदानेन तुल्यमेव भवेद्ध्रुवम् ।
कामकच्छपनिविडे परस्त्रीशफरीयुते ॥ ११

कल्यब्धौ पततां नृणां उद्धर्ता त्वं हि शङ्कर ।
ततः कलिमलासक्तान् जनानस्मानवेश्वर ॥ १२

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

इति सिद्धैस्सुसंस्पृष्टः सिद्धानाह महेश्वरः ।
सिद्धाः शृणुध्वं युष्माकं हिताय जगतामपि ॥ १३

वैद्यनाथस्थलमिति सिद्धिक्षेत्रं धरातले ।
भासते कलिजुष्टानां जनानां हितकारणम् ॥ १४

यूयं गच्छत तत्रैव वरं दास्ये झटित्यहम् ।
इत्युक्तास्ते महेशेन मेरोस्सिद्धास्सुरैस्सह ॥ १५

सदाशिवाज्ञयास्वप्नैः नभोमार्गेण निर्गताः ।
वैद्यनाथस्थलं प्राप्य गृध्रतीर्थतटं गताः ॥ १६

वैद्यनाथस्य पूजार्थमभिषेक्तुं समुद्यताः ।
कलिपापहरां गङ्गां सिद्धास्तुष्टुवुरादरात् ॥ १७

गङ्गे नमस्ते देवेशि कलिकल्मषनाशिनि ।
आपन्नार्तिहरे मातर्देवि तुभ्यं नमो नमः ॥ १८

सिद्धैस्तुता तदा गङ्गा वैद्यनाथस्थले शुभे ।
पुण्ये जटायुतीर्थे तु द्वापरान्ते मुनीश्वराः ॥ १९

आविरासीन्मुदा स्वाभिस्सखीभिस्सह सा नदी ।
तत्र प्रत्यक्षभूतास्ताः प्रवक्ष्यामि सुमाहिताः ॥ २०

यमुना नर्मदा गोदा बाहुदा सिन्धुरेव च ।
देविका सरयुः पुण्या चन्द्रभागा च गोमती ॥ २१

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

भद्रा क्षीरनदी तुङ्गा कृष्णा स्कन्दनदी तदा ।
गुञ्जा वेगवती शोणा कृष्णभद्रा च गोनदी ॥ २२

मणिमुक्ता ताम्रपर्णी कावेरी सरिदद्भुता ।
देवाद्भुतं पुष्करञ्च सूर्यपुष्करणी तदा ॥ २३

विधुपुष्करणी पुण्या स्वर्णपुष्करिणी द्विजाः ।
अच्छोदं मानसं चैव ब्रह्माण्डान्तर्गतानि च ॥ २४

एवमादि नदीभिश्च तीर्थैरन्यैश्च पुष्करैः ।
सहसा सहसा देवी स्वगङ्गा पापनाशिनी ॥ २५

माघमासे विशेषेण पञ्चम्थामिन्दुवासरे ।
गृध्रतीर्थे पुरस्तेषां सिद्धानामभवत्तदा ॥ २६

प्रादुर्भूतां समुद्वीक्ष्य सिद्धास्सह सुरैरपि ।
जटायुतीर्थे ते स्नात्वा नाम्ना गोक्षीरसंज्ञके ॥ २७

कृष्णश्रीगन्धकण्ठीं तां वैद्यनाथं महेश्वरम् ।
इत्यस्तुवन्महादेवं भक्त्याऽभीष्टप्रदायकम् ॥ २८

सिद्धाः -

वेदवेद्य कृपाधार जगन्मूर्ते शुभप्रद ।
अनादिर्वैद्यसर्वज्ञ नमस्ते भक्तवत्सल ॥ २९

सर्वलोकमहेशान कलिपापप्रणाशन ।
त्रिगुणाकार चिद्रूप ज्ञानदायक ते नमः ॥ ३०

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

क्षुद्रपीडावृतां नृणां कलौ त्वत्सेविनां शिव ।
समस्तरोगसंहर्त्रे भवरोगहराय च ॥ ३१

नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं दयानिधे ।
स्तोत्रेणानेन सुप्रीतो वैद्यनाथो महेश्वरः ॥ ३२

साक्षाद्भूतो महेशानः सिद्धान् प्राह दयानिधिः ।
वृणुध्वं सकलान् कामान् प्रदास्यामि सुरेश्वराः ॥ ३३

इत्युक्ताः भिषगीशेन वरं वव्रुर्जगद्धितम् ।
जटाय्वाख्यस्य तीर्थस्य मदीयं नामकं कुरु ॥ ३४

शुभे सिद्धामृते पुण्ये ये कुर्वन्ति निमज्जनम् ।
सर्वपापैः प्रमुच्येरन् सर्वान् कामान् लभन्तु ते ॥ ३५

भक्तवत्सल गौरीश ये त्वामत्र भजन्ति वै ।
कलिबाधा विनिर्मुक्ताः भवरोगविवर्जिताः ॥ ३६

पुत्रैः पौत्रैः परिवृताः सर्वान् कामान् च प्राप्य च ।
अन्ते स्वपितृभिस्साद्धं त्वत्पादाब्जमवाप्नुयुः ॥ ३७

इति सम्प्रार्थितो देवो वैद्यनाथो महेश्वरः ।
सिद्धानां बालया सार्धं देवानां प्रददावसौ ॥ ३८

युष्माभिः प्रार्थितं यद्यत् सिद्धास्सर्वं तथास्त्विति ।
अस्मदीयपुरे पुण्ये शुभे सिद्धामृते कलौ ॥ ३९

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कदाचित् स्नान्ति ये तेषां सर्वाभीष्टं ददाम्यहम् ।
पुण्यमासे मदीयेऽस्मिन् भिषगीशस्थले नराः ॥ ४०

अङ्गारवारे स्नात्वा मां उत्सवे वा यदा कदा ।
भजन्ति तेषामारोग्यं पुत्रसम्पत् भवेन्नृणाम् ॥ ४१

कृष्णश्रीगन्धकण्ठया च सार्धं नित्यं वसाम्यहम् ।
इति दत्वा वरान् शम्भुः वैद्यनाथो दयानिधिः ॥ ४२

तिरोदधे महादेवो भक्तानामिष्टदायकः ।
वैद्यनाथाद्वरं प्राप्य सिद्धास्सर्वे सुरैस्सह ॥ ४३

कलौ प्रच्छन्नरूपास्ते भिषगीशमुमापतिम् ।
आराध्य सकलान् कामान् लेभिरे मुनिपुङ्गवाः ॥ ४४

अगस्त्यः –

वैद्यनाथस्थले पुण्ये तस्मिन् सिद्धामृते नराः ॥ ४५

यस्मिकस्मिश्चिद्दिवसे चन्द्रसूर्योपरागयोः ।
सङ्क्रान्तिषु व्यतीपाते पित्रोर्मृतदिनेऽथवा ॥ ४६

स्नात्वा तिलाक्षतैर्भक्त्या तर्पयन्ति पितॄन् द्विजाः ।
त्रिस्सप्तकुलमुद्धृत्य सर्वान् कामानवाप्य च ॥ ४७

देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ।
आप्नुयुस्तत्पदं सत्यं भिषगीशप्रसादतः ॥ ४८

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

भिषगीशस्थले ये वै सिद्धामृतसरस्तटे ।
तीर्थश्राद्धं प्रकुर्वन्ति तेषां मुक्तिर्द्विजोत्तमाः ॥ ४९

गयायां पिण्डदानेन पितॄणां यादृशी भुवि ।
तृप्तिरासीत्तथा सिद्धामृततीर्थस्य तर्पणात् ॥ ५०

तीर्थैरत्यद्भुतैस्तत्र सिद्धानाममृतोपमैः ।
गङ्गा प्रत्यक्षभूताभूत् जटाय्वाख्ये सरोवरे ॥ ५१

तस्मात् सिद्धामृतमिति त्रिषु लोकेषु विश्रुतम् ।
गौरीब्रह्मकुजादीनां सर्वेषां स्नानमात्रतः ॥ ५२

यस्मिन् सिध्यन्ति काम्यानि सिद्धामृतमिति श्रुतम् ।
सिद्धास्सुराश्च गन्धर्वाः स्वर्गादादाय चामृतम् ॥ ५३

अभिषिच्य कलौ शम्भुमचिकित्साचिकित्सकम् ।
यस्माज्जटायुतीर्थं तु पूरयामासुरादरात् ॥ ५४

तस्मात् सिद्धामृतमिति प्रसिद्धं जगतीतले ।
तस्मिन् सिद्धामृते भानोर्वारे स्नात्वा नरोत्तमाः ॥ ५५

सदारोग्यास्तु ते शिष्टाः प्रसीदन्ति शिवास्पदम् ।
सोमवारे नराः स्नात्वा तस्मिन् सिद्धामृतोदके ॥ ५६

सर्वान् कामानवाप्याऽत्र शिवसायुज्यमाप्नुयुः ।
भौमवारे नरस्स्नात्वा तस्मिन् सिद्धामृतोदके ॥ ५७

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अरुणोदयवेलायां सर्वाभीष्टप्रदायके ।
सर्वरोगविनिर्मुक्ताः क्षेत्रलाभमवाप्नुयुः ॥ ५८

किञ्चिदभ्युदिते सूर्ये तस्मिन् सिद्धामृते शुभे ।
भौमवारे नरस्स्नात्वा वैद्यनाथं महेश्वरम् ॥ ५९

ये सेवन्ते नरा भक्त्या दीर्घमायुरवाप्य च ।
आरोग्यं जयमासाद्य क्षुद्ररोगान् विधूय च ॥ ६०

भोगान् भुक्त्वा महाभागाः शिवसायुज्यमाप्नुयुः ।
भौमवारे नरस्स्नात्वा तस्मिन् सिद्धामृते जले ॥ ६१

हृदंबुजे वैद्यनाथं ध्यायन्तस्ते मुनीश्वराः ।
प्राधान्यं जगतां प्राप्य चिरं भोगानवाप्नुयुः ॥ ६२

किञ्चिदभ्युदिते सूर्ये भौमवारे नरोत्तमाः ।
ये स्नात्वा नियमेनैव सिद्धामृतमहोदके ॥ ६३

कृष्णश्रीगन्धकण्ठीं तां ध्यायन्ति हृदयाम्बुजे ।
कुबेरसन्निभास्ते तु प्रमोदन्ते शिवास्पदे ॥ ६४

भौमवारे नरः स्नात्वा तस्मिन् सिद्धामृते वरे ।
ये ध्यायन्ति गुहं भक्त्या सुदृढाः प्रमुदान्विताः ॥ ६५

क्षुद्ररोगविनिर्मुक्ता दीर्घमायुरवाप्नुयुः ।
भौमवारे समागत्य सिद्धामृततटे शुभे ॥ ६६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

जलं स्पृष्ट्वा हृदि ध्यात्वा वैद्यनाथं मुदान्विताः ।
कुर्वन्ति प्रोक्षणं ये तु चुलुकोदकमात्रकम् ॥ ६७

तिलमात्रं माषमात्रं सिद्धामृतजलं शुभम् ।
पिबन्ति पुत्रं सद्रूपं शुभं विद्यावलैर्युतम् ॥ ६८

अवाप्य भोगान् भुक्त्वा ते शिवसायुज्यमाप्नुयुः ।
पञ्चाशत् कोटिविस्तीर्णे भूतले निवसन्ति ये ॥ ६९

द्वीपान्तरे वा ध्यायन्तो वैद्यनाथं च मानसे ।
स्नान्ति गङ्गाजलं स्नानजातं फलमवाप्नुयुः ॥ ७०

सौम्यवारे नरास्स्नात्वा तस्मिन् सिद्धामृते वरे ।
सर्वशास्त्रार्थतत्वज्ञाः दीर्घमायुरवाप्नुयुः ॥ ७१

गुरुवारे नरास्स्नात्वा तस्मिन् सिद्धामृतोदके ।
बुध्या बृहस्पतिसमाः त्रिकालज्ञानिनोऽपि ते ॥ ७२

इन्द्रस्य सदनं प्राप्य पौरोहित्यमवाप्नुयुः ।
भृगुवारे नरास्स्नात्वा तस्मिन् सिद्धामृते शुभे ॥ ७३

निधीन् सर्वानवाप्याशु शिवसायुज्यमाप्नुयुः ।
स्थिरवारे नरास्स्नात्वा तस्मिन् सिद्धामृते वरे ॥ ७४

शनिपीडाविनिर्मुक्ताः दीर्घमायुरवाप्नुयुः ।
माघमासे समागत्य वैद्यनाथस्थले नराः ॥ ७५

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

शुक्लप्रतिपदारभ्य स्वमापर्यन्तमास्तिकाः ।
सिद्धामृते पुष्करे ये स्नान्ति तेषामिदं फलम् ॥ ७६

आयुरारोग्यमैश्वर्यं पुत्रः शत्रु जयं स्वमी ।
सिध्यन्ति सत्यं देहान्ते मुक्तिरेव न संशयः ॥ ७७

माघमासे नरास्स्नात्वा तस्मिन् सिद्धामृते सकृत् ।
महारोगविनिर्मुक्ताः क्षुद्रपीडाविवर्जिताः ॥ ७८

पञ्चपातकनिर्मुक्ताः पुत्रैः पौत्रैस्समन्विताः ।
इह भुक्त्वाखिलान् भोगान् स्वमित्रैर्बन्धुभिस्सह ॥ ७९

त्रिसप्तकुलमुद्धृत्य शिवसायुज्यमाप्नुयुः ।
माघमासे सकृत् स्नात्वा गायत्रीं वेदमातरम् ॥ ८०

पञ्चाक्षरं जपं चान्यं मन्त्रं ब्राह्मणतर्पणम् ।
कृत्वा सिद्धामृतस्यास्य वैभवश्लोकमादरात ॥ ८१

यः श्रुणोति नरो भक्त्या करस्थास्तस्य सिद्धयः ।
ये दीपाराधनं कुर्युर्वैद्यनाथस्य भक्तितः ॥ ८२

अक्षिरोगाद्विनिर्मुक्ताः सर्वान् कामानवाप्नुयुः ।
प्रदक्षिणनमस्कारं श्रीरुद्रपठनं तथा ॥ ८३

बिल्वैरभ्यर्चनं चैव दानं ब्राह्मणभोजनम् ।
ये कारयन्ति कुर्वन्ति ते क्षुद्रादिविवर्जिताः ॥ ८४

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सर्वव्याधिविनिर्मुक्तास्सर्वान् कामानवाप्य च ।
देहान्ते शिवसायुज्यं लभेयुर्नात्र संशयः ॥ ८५

औषध्यः फलपाकान्ता माघमासे फलन्ति ताः ।
द्विजानां ये प्रयच्छन्ति तत्रत्यानां महात्मनाम् ॥ ८६

क्षुद्ररोगादिनिर्मुक्ताः पुत्रैः पौत्रैस्समन्विताः ।
इह भुक्त्वाऽखिलान् भोगान् ते शैवं पदमाप्नुयुः ॥ ८७

पुण्ये सिद्धामृते स्नात्वा माघे ये भक्तिपूर्वकम् ।
गुलमिश्रं तिलं पुण्यं तण्डुलं कदलीफलम् ॥ ८८

बदरीफलमन्यद्वा धात्रीफलमनुत्तमम् ।
दानं कुर्वन्ति मुक्तास्स्युः ते वै संसारबन्धनात् ॥ ८९

विद्यां षष्टिं यशः पुत्रान् राज्यलक्ष्मीं समाप्नुयुः ।
वैद्यनाथस्थले माघे पुण्ये सिद्धामृते नराः ॥ ९०

स्नात्वा ब्राह्मणमेकं वा त्रिंशच्च धरणीसुरान् ।
भोजयेद्यदि मृष्टान्नैः भोगान् भुक्त्वा यथेच्छया ॥ ९१

सर्वव्याधिविनिर्मुक्ताः शिवसायुज्यमाप्नुयुः ।
ये शृण्वन्ति नरा भक्त्या तीर्थमाहात्म्यमुत्तमम् ॥
गङ्गास्नानफलं प्राप्य शिवसायुज्यमाप्नुयुः ॥ ९२

इति श्रीशैवपुराणे कोटिरुद्रसंहितायां उत्कृष्टशिवक्षेत्रप्रकरणे श्रीवैद्यनाथस्थानमाहात्म्ये सिद्धामृतवैभववर्णनं नाम दशमोऽध्यायः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

॥ एकादशोऽध्यायः ॥

ऋषयः –

सिद्धामृतस्य पुण्यस्य वैभवोक्तस्त्वया मुने ।
कुम्भयोनेऽस्य कुण्डस्य गृध्रनामाङ्कितस्य च ॥ १

वक्तुमर्हसि सर्वज्ञ वैभवं करुणानिधे ।
वसिष्ठाद्यैः कृतः प्रश्नः अगस्त्यो मुनिरब्रवीत् ॥ २

अगस्त्यः —

मुनिश्रेष्ठा महाभागाः भाग्यवन्तो धरातले ।
गृध्रकुण्डस्य दिव्यस्य सर्वाभीष्टप्रदायिनः ॥ ३

सर्वरोगहरस्यास्य सर्वपापहरस्य च ।
कृतो युष्माभिरनघः प्रश्नस्सर्वहिते रतः ॥ ४

अहं कृतार्थो मुनयः शृणुध्वं प्रवदाम्यहम् ।
गृध्रकुण्डस्य माहात्म्यं सकृच्छृण्वन् पठन्नरः ॥ ५

सर्वरोगविनिर्मुक्तो दिव्यदेहो भवेद्द्विजाः ।
मणिमन्त्रोषधाख्यं तत् दिव्यं पञ्चाक्षरालयम् ॥ ६

रहस्यभूतं वरदं कुण्डं वेदमयं शुभम् ।
सप्तानामपि कोटीनां मन्त्राणामास्पदं द्विजाः ॥ ७

मणिमन्त्रौषधाख्यं तत् दिव्यं कुण्डधरातले ।
निर्मितं वैद्यनाथेन गृध्रकुण्डाभिधं भुवि ॥ ८

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

इत्युक्तास्तेन मुनिना कुम्भजेन मुनीश्वराः ।
प्रत्यूचुर्वारुणं प्रीत्या कुम्भयोनिं दयानिधिम् ॥ ९

ऋषयः –

अगस्त्य करुणा सिन्धो वैद्यनाथस्थले कथम् ।
निर्मितं वैद्यनाथेन केन कारणतः कदा ॥ १०

मणिमन्त्रौषधाख्यं तत् दिव्यं नाम भवेत्कथम् ।
विस्तराच्छ्रोतुमिच्छामो गृध्रकुण्डस्य वैभवम् ॥ ११

सर्वज्ञो हि भवान् लोके तत्सम्यग्वक्तुमर्हसि ।
इति तेषां वचः श्रुत्वा मुनीनां कुम्भजो मुनिः ॥ १२

मुनीन् समब्रवीदेवं लोकानां हितकाम्यया ।

अगस्त्यः –

गृध्रकुण्डस्य चोत्पत्तिं मणिमन्त्रौषधाभिधम् ॥ १३

कुण्डदिव्यं च योर्नाम्नोरेतयोरादिकारणम् ।
वक्ष्यामि श्रूयते नृणां सौभाग्यारोग्यदं द्विजाः ॥ १४

पुरा दैत्यगुरुर्मन्त्रान् क्षुद्रान् मायाबलान् कविः ।
आदिदेवासुराणां यान् पुरश्चरणलंपटान् ॥ १५

मन्त्रान् लब्ध्वा गुरोर्दैत्याः सिद्धिं प्राप्य प्रसादतः ।
बलोद्धतास्समाहूय युयुधुः विबुधैस्सह ॥ १६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वर्षाणामयुतं भीममसुराणां दिवौकसाम् ।
युद्धं समभवद्घोरं क्षुब्धं समभवत्तदा ॥ १७

देवाः पाशुपतादीनि शस्त्राणि समराङ्गणे ।
चोदयामासुरुपरि दैत्यानाममरैर्हताः ॥ १८

दैत्या निर्जरशस्त्रैस्तु भिन्नदेहास्सुकोपिताः ।
आग्नेयादीनि चास्त्राणि सुराणामुपरि द्विजाः ॥ १९

क्षुद्रमन्त्रैः सुसंयोज्य चोदयामासुरञ्जसा ।
आग्नेयादिभिरस्त्रैस्तैः क्षुद्रमन्त्रयुतैस्सुराः ॥ २०

सच्छिन्नाः सन्धिदेहास्ते हतशेषाश्च रोगिणः ।
क्षुद्रप्रेरणया भ्रान्ताः भ्रष्टराज्याः पराजिताः ॥ २१

व्याधिभिर्बाध्यमानाश्च चिकित्सारहितास्सुराः ।
सञ्चरन्तस्तत्र तत्र तदोपद्रवशान्तये ॥ २२

क्वापि शान्तिकर्तारं तस्य रोगस्य भूतले ।
अदृष्ट्वा चिन्तयायुक्ताः स्वशरीरवचोऽमृतम् ॥ २३

पीत्वा श्रोत्रपुटाभ्यां तु तदाज्ञावशवर्तिनः ।
दीन दिष्ट्या परं प्राप्ताः वैद्यनाथस्थलं महत् ॥ २४

विस्मितास्सस्नुरमराः गोक्षिराख्ये सरोवरे ।
ततो देवालयं प्राप्य पूजां कृत्वा यथाविधि ॥ २५

शरण्यं वैद्यनाथं तं प्रापुर्नेमुः पदाम्बुजम् ।
अस्तुवन् परमेशानं वैद्यनाथं दयानिधिम् ॥ २६

 Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

देवाः –

स्वामिन् सर्वजगन्नाथ सर्वरोगचिकित्सक ।
क्षुद्ररोगभयार्तान्नः त्राहि त्राहि महाप्रभो ॥ २७

अचिकित्साचिकित्साय चाद्यन्तरहिताय च ।
सर्वलोकैकवन्द्याय वैद्यनाथाय ते नमः ॥ २८

अप्रमेयाय महते सुप्रसन्नमुखाय च ।
अभीष्टदायिने तुभ्यं वैद्यनाथाय ते नमः ॥ २९

मृत्युञ्जयाय सर्वाय मृडानी वामभागिने ।
वेदवेद्याय रुद्राय वैद्यनाथाय ते नमः ॥ ३०

श्रीरामभद्रवन्द्याय जगतां हितकारिणे ।
सोमार्धधारिणे तुभ्यं वैद्यनाथाय ते नमः ॥ ३१

नीलकण्ठाय सौमित्रिपूजिताय मृडाय च ।
चन्द्रवह्न्यर्कनेत्राय वैद्यनाथाय ते नमः ॥ ३२

शिखिवाहनवन्द्याय सृष्टिस्थित्यन्तकारिणे ।
मणिमन्त्रौषधेशाय वैद्यनाथाय ते नमः ॥ ३३

गृध्रराजाभिवन्द्याय दिव्यगङ्गाधराय च ।
जगन्मयाय सर्वाय वैद्यनाथाय ते नमः ॥ ३४

कुजवेदविधीन्द्राद्यैः पूजिताय चिदात्मने ।
आदित्यचन्द्रवन्द्याय वैद्यनाथाय ते नमः ॥ ३५

स्तोत्रेणानेन सन्तुष्टो वैद्यनाथो महेश्वरः ।
तदाब्रवीत् सुरान् सर्वान् लोकानां हितकाम्यया ॥ ३६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वरं वृणुत भद्रं वो ददाम्यहमरिन्दमाः ।
इत्युक्ता वैद्यनाथेन सर्वदेवा मुदान्विताः ॥ ३७

आदिवैद्येश्वर वक्त्रु रेवं कारुणिकोत्तमम् ।

देवाः —

वैद्यनाथ महादेव वामदेव नमो नमः ॥ ३८

भक्तवत्सल देवेश प्रपञ्चपरिरक्षण ।
असुरैश्छिन्नहृदयच्छिन्नपाणितला वयम् ॥ ३९

हतशेषाः क्षुद्रसङ्घश्वेतकुष्ठादि पीडिताः ।
अपस्मारक्षयाद्यैश्च व्याधिराजमुखैर्हताः ॥ ४०

शीततापज्वराद्यैश्च बाध्यमानाऽनिशं वयम् ।
त्वत्पदाम्भोजयुगलं प्राप्ताश्शरणमद्य भोः ॥ ४१

रक्ष रक्ष महेशान शरणागतरक्षक ।
दृढगात्रान् कुरु क्षिप्तं अस्मान् त्वत्पादसेविनः ॥ ४२

जितासुरान् जयैर्युक्तान् पुनः प्राप्तपदानपि ।
एवमुक्तस्सुरैः शम्भुर्भक्तानामिष्टदायकः ॥ ४३

भेषजं कर्तुमिच्छावान् जगतां हितकाम्यया ।
सर्वसञ्जीवनं पीठं चतुरश्रं सकुण्डकम् ॥ ४४

चतुर्णवसहस्राणां व्याधीनां नाशकारकम् ।
अणिमादिप्रदं पुण्यं दर्शनादघनाशनम् ॥ ४५

दिव्यं तेजःप्रदं वामभागे संस्थापितं मया ।
यन्त्ररेखासमायुक्तं बहुशक्ति शुभप्रदम् ॥ ४६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

परमाणुपरामर्शाद्द्रोणः कुण्डस्य तस्य वै ।
क्षुद्रसङ्घप्रशमनं सर्वपापहरं शिवम् ॥ ४७

मणिमन्त्रौषधमयं दिव्यं रोगविनाशकम् ।
ब्रह्मराक्षसमुख्यानां विद्रावण विचक्षणम् ॥ ४८

कुण्डस्य परितश्चास्य सर्वदा परिरक्षिणः ।
सप्तकोटिमहामन्त्राः कल्पिताः शक्तिसंयुताः ॥ ४९

दिक्षु चाष्टसु चेशान्यां वेदाश्चोपनिषण्मुखाः ।
प्रथमावरणे पुण्ये कल्पिताः पूर्वमेव हि ॥ ५०

तस्मात् कारणतो देवाः मदनुज्ञावशादलम् ।
श्रूयताममरा यूयं अस्मिन् गोक्षीरपुष्करे ॥ ५१

स्नात्वा प्रदक्षिणं कृत्वा नत्वा विघ्नेश्वरं पुरा ।
कृष्णश्रीगन्धकण्ठीं तां स्कन्दमावरणेश्वरान् ॥ ५२

मां वैद्यनाथं संसेव्य कृतमालासुमैस्तथा ।
समभ्यर्च्य परं देवा कृत्वा भक्तिपुरस्सरम् ॥ ५३

मणिमन्त्रौषधाख्येऽत्र कुण्डे चादाय मृत्तिकाम् ।
अभिषेकजलेनैव पञ्चगव्यादिभिः शुभैः ॥ ५४

गन्धोदकेन शुचिना सिद्धामृतजलेन च ।
प्रोक्षयित्वा स्वदेहेषु कुरुताद्य विलेपनम् ॥ ५५

तन्मृल्लेपनमात्रेण मत्प्रसादात् भवद्र्यथा ।
क्षुद्ररोगाः क्षयाद्याश्च नश्यन्त्वसुरचोदिताः ॥ ५६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

जरामरणनिर्मुक्ताः दिव्यान्यङ्गान्यवाप्स्यथ ।
नित्यत्वं यौवनं चैव त्वसुरेभ्यो जयं तथा ॥ ५७

सौन्दर्यः स्वस्यराज्यं च प्राप्नुथान्यान्मनोरथान् ।
इत्यनुग्राह्य विबुधान् भिषगीशे वरप्रदे ॥ ५८

विरते विबुधास्तत्र गोक्षीर तदनुज्ञया ।
स्नात्वा गणपति नत्वा बालिकां स्कन्दमेव च ॥ ५९

अन्यानावरणीभूतान् देवान्नत्वा क्रमान्मुदा ।
प्रदक्षिणत्रयं कृत्वा कृतमालासुमैरपि ॥ ६०

कृष्णश्रीगन्धकण्ठौं तामादिवैद्येश्वरं सुमैः ।
समभ्यर्च्य नमस्कृत्य भक्त्या साञ्जलिबन्धनः ॥ ६१

मणिमन्त्रौषधाख्यस्य कुण्डस्य समुपागताः ।
समीपे मृदमादाय चाभिषेकजलैरपि ॥ ६२

अन्यैस्तीर्थैः पञ्चगव्यैस्तथा गन्धोदकैरपि ।
भक्तियुक्तास्सुरास्सर्वे मर्दयन्तोऽथ मृत्तिकाम् ॥ ६३

मौनिनो लेपयित्वा ते सर्वाङ्गेषु तदो द्विजाः ।
भक्षयित्वा तदा सद्यो दिव्यदेहा बभूविरे ॥ ६४

नेशुस्सुराणां गात्रेभ्यो क्षुद्ररोगादयस्तदा ।
विस्मयं परमं जग्मुस्सर्वे देवा मुदान्विताः ॥ ६५

नित्यत्वं यौवनं चैव सौन्दर्यं च पराक्रमम् ।
शौर्यं वीर्यं च संप्राप्य जरामरणवर्जिताः ॥ ६६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वैद्यनाथं महादेवं सम्यक् संपूज्य भक्तितः ।
अनुज्ञाप्य महेशानं स्वां पुरीं प्राप्य खेचराः ॥ ६७

युद्धं कृत्वा महाघोरं असुरैस्सह दानवैः ।
संहृत्य दैत्यानस्त्रैश्च जयं प्राप्य मुदान्विताः ॥ ६८

भजन्ते भिषगीशस्य प्रसादादतुलां श्रियम् ।

अगस्त्यः —

वैभवाद्वैद्यनाथस्य मणिमन्त्रौषधस्य च ॥ ६९

धूल्युद्धूलनमात्रेण सुरा रोगविवर्जिताः ।
दिव्यदेहा भवन्त्यस्मात् दिव्यकुण्डमिति श्रुतम् ॥ ७०

रक्षार्थं देवतानां च जगतां रोगशान्तये ।
सिद्ध्यर्थमणिमादीनां पीडं स्थापितवान्यतः ॥ ७१

यन्त्ररेखासमायुक्तं गृध्रराजपुरे शिवः ।
भेषजं कृतवान् शम्भुः वैद्यनाथोऽभवत्ततः ॥ ७२

मणिमन्त्रौषधान्येन सम्यक् स्थापितवान्यतः ।
मणिमन्त्रौषधाख्यं तत् प्रसिद्धं भुवि केवलम् ॥ ७३

दर्शनात् पापसङ्घातनाशकं जगतां हितम् ।
मणिमन्त्रौषधाख्य(स्य) कुण्डस्यालेपनान्मृदः ॥ ७४

चिकित्सारहिता देवा रोगेभ्यो मोचिता यतः ।
आदिवैद्येश्वरस्तस्मादचिकित्साचिकित्सकः ॥ ७५

भिषगीशोऽभवल्लोके सर्वाभीष्टप्रदायकः ।
मणिमन्त्रौषधाख्यं तत् कुण्डं वैद्येश्वरस्थले ॥ ७६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कृते हेममयं दृष्टं त्रेतायां रजतात्मकम् ।
द्वापरे ताम्ररूपं तत् कले मृद्रुपमद्भुतम् ॥ ७७

मणिमन्त्रौषधं कुण्डमलङ्कुर्वन्ति भक्तितः ।
तेषामारोग्यमायुश्च रूपं भाग्यं भवेद्ध्रुवम् ॥ ७८

संपातिश्च जटायुश्च परस्परजिगीषया ।
उच्चेलतुर्नभोमार्गे त्वहं पूर्विकया पुनः ॥ ७९

तावुभौ मण्डलं भानोर्ग वा तस्यांशुमण्डलैः ।
प्लुष्टपक्षौ विसंज्ञौ च पेततुर्धरणीतले ॥ ८०

संपातिस्तु तयोर्मध्ये विन्ध्यपर्वतमाप्तवान् ।
जटायुर्वैद्यनाथाख्ये पुण्यक्षेत्रेऽतिभासुरे ॥ ८१

मणिमन्त्रौषधाख्ये तु कुण्डे सर्वार्थसिद्धिदे ।
पतन् तस्य च माहात्म्यं वैभवाद्विहगाधिपः ॥ ८२

सपक्षस्सबलो भूत्वा लब्धसंज्ञः क्रमेण सः ।
चक्षुरुन्मील्य तेजस्वी दृष्ट्वा लिङ्गं तदाद्भुतम् ॥ ८३

स्नात्वा गोक्षीरतीर्थेऽथ कल्पकाख्य गणाधिपम् ।
कृष्णश्रीगन्धकण्ठीं च बालिकां स्कन्दमीश्वरम् ॥ ८४

वैद्यनाथं सुसम्पूज्य प्रदक्षिणमथाकरोत् ।
पतित्वा दण्डवद्भूमौ स्तोत्रवृन्दैरतोषयत् ॥ ८५

गृध्रेशः —

वैद्यनाथ महादेव नमस्ते भक्तवत्सल ।
विधिविष्णुमुनीन्द्राद्यैः अर्च्यमानपदांबुज ॥ ८६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

गङ्गाधर जगन्मूर्ते चन्द्रवह्न्यर्कलोचन ।
पिनाकपाणे विश्वेश भिषगीश नमोऽस्तु ते ॥ ८७

अप्रमेय जगन्नाथ नीलकण्ठ महेश्वर ।
वेदवेद्य कृपाधार जगन्मूर्ते शुभप्रदम् ॥ ८८

अनादिवैद्य सर्वज्ञ त्वचिकित्साचिकित्सक ।
मदनान्तक गौरीश भिषगीश नमोऽस्तु ते ॥ ८९

स्तोत्रेणानेन सन्तुष्टो वैद्यनाथो महेश्वरः ।
गृध्रेशार्चनया प्रीतः प्रादुर्भूतो महेश्वरः ॥ ९०

वरं वृणु च भद्रं ते प्रीतोऽस्मि तव पूजनात् ।
स्तोत्रेण चाहं दास्यामि जटायोः वाञ्छितं शुभम् ॥ ९१

इत्युक्तो वैद्यनाथेन वरं वव्रे महेश्वरम् ।

जटायुः –

वैद्यनाथ महादेव मणिमन्त्रौषधेश्वर ॥ ९२

नमस्ते देवदेवेश भक्तवत्सल ते नमः ।
त्वयि भक्ति दृढं देहि मणिमन्त्रौषधं भुवि ॥ ९३

कुण्डं मन्नाम ते देव जटाय्वाख्यं भवेज्ज्वलत् ।
किं च देव स्थलमिदं गृध्रेशनगरं भवेत् ॥ ९४

मत्कुण्डस्य वरस्यास्य मृत्तिकां धारयन्ति ये ।
ते क्षुद्ररोगनिर्मुक्ता महारोग विवर्जिताः ॥ ९५

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

आयुरारोग्यमैश्वर्यं मणिमादि जयं शुभम् ।
इह लोकेऽखिलान् भोगान् पुत्रदारादिभिस्सह ॥ ९६

अन्यैस्सुदुर्लभान् भुक्त्वा त्वत्सायुज्यं लभन्तु ते ।
एवं सम्प्रार्थितस्तेन गृध्रराजेन शङ्करः ॥ ९७

गृध्रेशस्य तथा दत्वा प्रार्थितानि वराण्यपि ।
तिरोधत्ते महादेवो वैद्यनाथो महेश्वरः ॥ ९८

गृध्रराजोऽपि सम्प्राप्य भिषगीशाद्वरं प्रियम् ।
अन्ते शिवपदं प्राप वैद्यनाथप्रसादतः ॥ ९९

एवं परःशता लीला भिषगीशस्य चाद्भुताः ।
हिरण्यवर्मा भूपालो गृध्रकुण्डस्य वैभवात् ॥ १००

मृत्तिकालेपनेनैव महारोगविवर्जितः ।
स्वर्णाकारशरीरोऽभूद्वैद्यनाथस्य वैभवात् ॥ १०१

जटायुकुण्डमाहात्म्यं ये शृण्वन्ति पठन्ति च ।
आयुरारोग्यमैश्वर्यं सर्वां सिद्धिमवाप्नुयुः ॥ १०२

इति श्रीशैवपुराणे कोटिरुद्रसंहितायां उत्कृष्टशिवक्षेत्रप्रकरणे श्रीवैद्यनाथस्थानमाहात्म्ये जटायुकुण्डमहिमानुवर्णनं नाम एकादशोऽध्यायः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

॥ द्वादशोऽध्यायः ॥

अगस्त्यः —

भूयो वक्ष्यामि माहात्म्यं वैद्यनाथस्य शूलिनः ।
शृण्वतां पठतां पुंसामायुरारोग्यदायकम् ॥ १

वैद्यनाथस्य पूर्वस्यां दिशि मन्नामतीर्थकम् ।
पुण्यं चकास्ति पापघ्नं तत्तीर्थस्नानमात्रतः ॥ २

सिध्येत् कल्याणमाग्नेय्यां ब्रह्मकुण्डमिति श्रुतम् ।
तत्र स्नात्वा महापुण्ये यद्दद्यादणुमात्रकम् ॥ ३

तत्सर्वं कोटिगुणितं स्नानं दानं शिवार्चनम् ।
भिषगीशस्य नैरृत्यां कोदण्डतटिनी वरा ॥ ४

रामतीर्थमिति ख्यातं महापापहरं नृणाम् ।
वैद्यनाथस्य निकटे दक्षिणे परमाद्भुतम् ॥ ५

सिद्धामृतमिति ख्यातं कलौ सर्वार्थसिद्धिदम् ।
मृत्तिकां गृध्रकुण्डस्य वैद्यनाथाभिषेकजैः ॥ ६

गन्धोदकैः पञ्चगव्यैः मर्दयित्वा समाहिताः ।
ये लेपयेयुर्भक्त्या च श्वेतकुष्ठादि रोगतः ॥ ७

क्षुद्रदोषैर्विनिर्मुक्ता दिव्यदेहाश्च सुन्दराः ।
गन्धर्वरूपसदृशा महापापैर्विवर्जिताः ॥ ८

आरोग्यं बलमायुष्यं दीर्घमायुरवाप्नुयुः ।
देशान्तरस्थितो यो वा गृध्रऋक् स्कन्दनामके ॥ ९

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मणिमन्त्रौषधात् कुण्डात् मृदमादाय भक्तितः ।
धृत्वा क्षुद्रादिरोगेभ्यो मुच्यते नात्र संशयः ॥ १०

गृध्रस्य गृध्रकुण्डस्य दर्शनं भाग्यसिद्धये ।
ज्वरादिभिः पीडितोऽपि तथा कुष्ठादिभिर्वृतः ॥ ११

अपस्मारादिभिश्चैव भूतप्रेतादिभिस्तथा ।
अन्यैः क्षुद्रादिसङ्घैश्च संवृतः पीडितोऽपि वा ॥ १२

तेभ्यो विमुच्यते सद्यः गृध्रकुण्डस्य दर्शनात् ।
वैद्यनाथस्थले पुण्ये रुद्राक्षं धारयन्नरः ॥ १३

विभूतिं धारयन् धीमान् शिवपूजां करोति यः ।
सर्वोपद्रवसङ्घातैर्मुच्यते नात्र संशयः ॥ १४

कृष्णश्रीगन्धकण्ठीं ये वैद्यनाथं प्रदक्षिणम् ।
ये कारयन्ति कुर्वन्ति तेषां वक्ष्ये फलं द्विजाः ॥ १५

अश्वमेधसहस्रस्य प्राप्नुवन्ति फलं ध्रुवम् ।
वैद्यनाथस्थले पुण्ये पुण्यारामं महेशितुः ॥ १६

यः करोति नरो भक्त्या चेहाभीष्टमवाप्य सः ।
कैलासभागे वासो वा देवेन्द्रत्वं भवेत् ध्रुवम् ॥ १७

भिषगीशपुरे यज्ञं ये कुर्वन्ति द्विजोत्तमाः ।
तेऽवाप्य सकलान् कामान् व्रजेयुः शाम्भवं पदम् ॥ १८

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

शिवरात्रव्रतादीनि वैद्यनाथस्थले द्विजाः ।
ये कुर्वन्ति नरा भक्त्या तेषां वक्ष्ये फलादिकम् ॥ १९

क्षुद्ररोगविनिर्मुक्तास्सर्वरोगविवर्जिताः ।
अवाप्य सकलान् कामान् व्रजेयुः शाङ्करं पदम् ॥ २०

वैद्यनाथस्थले पुण्ये यो ददाति द्विजातये ।
अन्नदानं रसोपेतं श्रद्धाभक्तियुतो नरः ॥ २१

तस्य पुण्यफलं वक्तुं न शक्नोमि मुनीश्वराः ।
वैद्यनाथस्थले पुण्ये कन्यादानं करोति यः ॥ २२

पुत्रपौत्रैः परिवृतः सार्वभौमो भवेद्ध्रुवम् ।
सस्ययुक्तां धरां तत्र वैद्यनाथस्थले नरः ॥ २३

यो ददाति दरिद्राय ब्राह्मणाय महात्मने ।
सप्तसागरपर्यन्तभूमिदानस्य यत्फलम् ॥ २४

तत्फलं प्राप्य तेजस्वी सोऽन्तेशिवपदं व्रजेत् ।
वैद्यनाथस्थले पुण्ये प्रपादानं करोति यः ॥ २५

अश्वमेधफलं प्राप्य शिवसायुज्यमाप्नुयात् ।
दुकूलं व्यजनं छत्रं शिबिकामम्बरं तथा ॥ २६

किरीटं भूषणं चैव वैद्यनाथस्थलेऽमले ।
श्रीगन्धकुसुमं दिव्यं मृगनाभिं च चन्दनम् ॥ २७

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

गोदानमश्वदानं वा गजदानं च कम्बलम् ।
मरीचिदशदानानि ये कुर्वन्ति द्विजातये ॥ २८

तेषां पुण्यफलं वक्तुं सहस्रवदनोऽक्षमः ।
श्वेतारण्ये च केदारे गजारण्ये वटालये ॥ २९

रामेशे कुम्भघोणे च गोकर्णे चित्सभास्थले ।
विरूपाक्षोऽर्जुनग्रामे त्यागराजपुरे वरे ॥ ३०

श्रीशैले चम्पकारण्ये वेदारण्यस्थले द्विजाः ।
महादानसहस्राणि यत्कृत्वा फलमाप्नुयात् ॥ ३१

तत्फलं वैद्यनाथेऽस्मिन् निष्कमात्रस्य दानतः ।
यः करोति नरो भक्त्या चाभिषेकं समाहितः ॥ ३२

आराधनशतं क्षीरैर्दधिभिश्च सहस्रकम् ।
घृताभिषेकैरयुतमपराधं सहेच्छिवः ॥ ३३

पञ्चामृतैः पञ्चगव्यैः ये कुर्वन्त्यभिषेचनम् ।
पञ्चपातकसन्धैस्ते मुच्यन्ते नात्र संशयः ॥ ३४

गन्धाभिषेकतस्सम्यक् भुक्त्वा भोगाननेकशः ।
ततः कैलासपदवीं प्राप्नुयुर्मुनिसत्तमाः ॥ ३५

ये वाध्यमानाः क्षुद्रैश्च श्वेतकुष्ठादिभिस्तथा ।
वैद्यनाथं समभ्यर्च्य बिल्वैस्साहस्रनामकैः ॥ ३६

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मुक्तास्स्युः नात्र सन्देहः सत्यं सत्यं वदाम्यहम् ।
बहुनात्र किमुक्तेन भवन्तोऽपि महात्मनः ॥ ३७

पूजयध्वं महादेवं वैद्यनाथं महेश्वरम् ।
स्तुत्वा च विविधैस्तोत्रैः प्रार्थयित्वा मनोरथान् ॥ ३८

तत्रोषित्वा त्रिरात्रं च भोगान् भुञ्जत हे द्विजाः ।
इत्यगस्त्योदितान् धर्मान् सर्वपापप्रणाशनान् ॥ ३९

निशम्य शिरसा भक्त्या नेमुः कलशसम्भवम् ।
पूजयामास पाद्यार्घ्यैः गन्धपुष्पाक्षतादिभिः ॥ ४०

दिव्यपुष्पैः समभ्यर्च्य दिव्यगन्धानुलेपनैः ।
उत्थायोत्थाय धर्मिष्ठाः प्रणम्य च मुहुर्मुहुः ॥ ४१

कृताञ्जलय उचुस्ते कृतार्थेनान्तरात्मना ।

शौनकादि ऋषयः —

वयमेव कृतार्थास्स्मः पाविताऽस्मो महामुने ॥ ४२

यच्छ्राविताऽस्मः सद्धर्मा अत्रागत्य स्वयं त्वया ।
अद्य नस्सफलं जन्म चाद्य नस्सफलं व्रतम् ॥ ४३

अद्य नः पितरस्तृप्ताः चाद्य नः सफलं कुलम् ।
पूजिताश्च महात्मानो अस्माभिः पूर्वजन्मनि ॥ ४४

सेवितानि च तीर्थानि दानानि सुकृतानि च ।
सत्सङ्गमो यथा भूयात् सत्कथाश्रवणं कृतम् ॥ ४५

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

केवलं भक्तियोगेन सुलभो भगवाञ्छिवः ।
नेष्टापूर्तादिभिर्धर्मैः श्रुतोऽस्माभिर्महामुने ॥ ४६

अहो श्रीवैद्यनाथस्य माहात्म्यं श्रुतमद्य नः ।
सदा सत्सङ्गतिः कार्या विद्वद्भिः पापभीरुभिः ॥ ४७

सत्सङ्गेन भवाम्भोधिस्सुलभस्तर्तुमञ्जसा ।
परं पापयुता वापि कुर्युः सत्सङ्गतं बुधाः ॥ ४८

सत्सङ्गेन विना नृणां भवाब्धेः नौषधं महत् ।
नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ ४९

ते पुनन्त्युरुकालेन दर्शनादेव साधवः ।
संसारिणो वयं ब्रह्मन् ब्रह्ममूर्तिः कुतो भवान् ॥ ५०

पुरा सञ्चितसद्धर्मात् त्वत्सङ्गतिरभूच्च नः ।
वयं कृतार्था हे ब्रह्मन् उत्तीर्णास्स्मो भवाम्बुधेः ॥ ५१

यदश्रौषाम माहात्म्यं वैद्यनाथस्य शूलिनः ।
अत्रैव सर्वधर्माश्च सर्वे यज्ञाश्च नैगमाः ॥ ५२

अत्रैव सर्वे तीर्थानि कथां श्रुत्वा हरस्य वै ।
इत्यश्रुलोचनी भूता महात्मानो मुनीश्वरम् ॥ ५३

पूजयित्वा यथान्यायमाशीर्भिरभिनन्दिताः ।
घटोद्भवं महात्मानं अनुज्ञाप्य मुनीश्वराः ॥ ५४

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वैद्यनाथस्थलं प्राप्य पूजयित्वा महेश्वरम् ।
आराध्य सकलान् कामानवाप्यात्ममनोरथान् ॥ ५५

देहान्ते शिवसायुज्यं लेभिरे ते मुनीश्वराः ।

सूतः –

वैद्यनाथस्य माहात्म्यं श्लोकमात्रं पठन्ति ते ।
शृण्वन्ति तेऽखिलान् कामान् लभन्ते मनुजा ध्रुवम् ॥ ५६

इदं माहात्म्यमखिलं वेदसारं शुभावहम् ॥ ५७

वैद्यनाथस्य शृण्वन्ति सर्वान् कामान्वाप्नुयुः ।

ऋषयः –

सूत सूत महाप्राज्ञ जीव जीव शतं समाः ॥ ५८

विचित्रं वैद्यनाथस्य माहात्म्यं श्रुतिगोपितम् ।
श्रावितास्सः महाभाग भवाब्धेस्तारिता वयम् ॥ ५९

कृतार्थाश्च महान् लाभं तपो नः किमतःपरम् ॥ ६०

इति प्रसन्नानननीरजा मुदा
ते काश्यपाद्या मुनयो मुमुक्षवः ।
शम्भोश्चरित्रश्रवणोत्सुकोत्सुको
गन्धाक्षताभिः पुनरप्यपूजयन् ॥ ६१

इति श्रीशैवपुराणे कोटिरुद्रसंहितायां उत्कृष्टशिवक्षेत्रप्रकरणे
श्रीवैद्यनाथस्थानमाहात्म्ये द्वादशोऽध्यायः ॥

॥ वैद्यनाथस्थलपुराणं समाप्तम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

SARASVATI MAHAL LIBRARY PRESS, THANJAVUR

Center for Shaiva Studies, Pondicherry Collection